CC-0. Digitized by eGangotri and MIDF- Delhi

श्री गोपेश्वर माहात्म्यम्

(संक्षिप्त नेपाली कथासार सहित)



लेखकद्वय

लोकनाथ लुइटेल खेमनाथ निरौला

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रीमान् अध्यक्ष ज्यू
'जयतु संस्कृतम्' संस्था-
लाई समर्पण गर्दछु
लोकनाथ लुइटेल
२०६५।७।२०

प्रकाशक

श्रीगोपेश्वर शिवालय संरक्षण समिति, पिप्ले तेह्रथुम

प्रकाशन तिथि

२०६२ वैशाख पूर्णिमा

प्रथम संस्करण

७०० प्रति

सर्वाधिकार

मन्दिर संरक्षण समितिमा

लेखकद्वय

लोकनाथ लुइटेल

खेमनाथ निरौला

मुद्रण

भागवत प्रिन्टर्स (छापाखाना) विराटनगर-७

फोन नं. ०२१-५२५४७४ (प्रेस), ५२३३९४ (पसल)

मूल्य

मन्दिर सहयोगार्थ रु. १२५।-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गोपेश्वरमाहात्म्यस्य महत्ता

नेपालाधिराज्यस्य पूर्वाञ्चलस्थतेह्रथुममण्डलान्तर्गत कालिमाटीनामकस्थाननिवासिना साहित्याचार्यपदालङ्कृतेन नैपालकदीर्घकालीनशिक्षासेवानिवृतेन मनीषिवर्येण लोकनाथलुइटेलमहोदयेन रचितं गोपेश्वरमाहात्म्याभिधं खण्डकाव्यायितं प्रवन्धमिमं विहङ्गमदृष्ट्याऽहं व्यलुलोकम्। एकादशसु, अध्यायेषु ---श्लोकैःसमापिते ऽ स्मिन् गोपेश्वरमाहात्म्ये, आधिक्येन, अनुष्टुप्छन्दः प्रयोगसूतशौनकसंवादादिरीतितः पौराणिकशैल्याश्रिता । प्रवन्धे ऽ स्मिन् स्थले स्थले मालिनी–वंशस्थ–द्रुतविलम्बितवसन्ततिलकोपजातिप्रभृतीनि च्छन्दांसि प्रयुक्तानि । अनुष्टुबतिरिक्तच्छन्दःप्रयोगस्थले सरसता–माधुर्यालङ्कारचमत्कार–पदसौष्ठवादिना काव्यकलाचमत्कार उत्कृष्टो दृश्यते । यजुःसंहितास्थ–रुद्राध्यायगतमन्त्राणां लौकिकसंस्कृते रूपान्तरितैः पद्यैः कविवरस्य प्रतिभा विशिष्टा प्रतिभाति।

विश्वब्रह्माण्डनायकः परब्रह्मात्मक :अनाद्यनन्तो भगवान् नारायण एक एव । तस्यैव मूर्तित्रयरूपा ब्रह्मविष्णुमहेश्वरा गुणत्रयमाश्रित्य सृष्टि–स्थिति–संहारान् कुर्वन्ति । अत्र विषये पौराणिकी रीतिरेवात्र कविना
स्वीकृता।

एतन्माहात्म्यस्यान्तर्हृदयायितो विषयो वर्तते – शिवकेशवयोरेकता , शिवो विष्णुश्च एकस्यैव परमेश्वरस्य रूपद्वयम् , इमौ द्वौ देवौ भेददृष्ट्या न द्रष्टव्यौ । इदमत्र ज्ञातव्यम्–सनातनवैदिकधर्मावलम्बिनाम् ,आराधनीया : पञ्चदेवा गणेश–सूर्य–देवी–शिव–विष्णव : आदिमयुगादेव विश्रुता :। अष्टादश महापुराणानि द्विविधानि सन्ति – शिवमूलकानि विष्णुमूलकानि च। शैव–लिङ्ग– स्कान्दादीनि शिवमूलकानि , वाराह–पाद्म– भागवतादीनि विष्णुमू लकानि। शिवमूलकै : शिव : , विष्णुमूलकैश्च विष्णु : कर्ता भर्ता संहर्ता विश्वब्रह्माण्डस्येति मन्यते। सामान्यत : पञ्चानामेव गणेश–सूर्य– देवी–शिव–विष्णूनां समादरो यत्र तत्र सर्वेषु पुराणेषु वर्तते। अत्रापि कविमहोदयेन प्रारम्भे पञ्चानामेव वन्दना कृता। अस्या :कृते : मूलभूतविषयश्च शिवकेशवयोरेकतेति। "गोपेश्वर"शब्दस्य द्वावर्थौ स्वीकृतौ।
गा :पातीति गोप : गोप एवेश्वर :गोपेश्वर : कृष्ण :। गा :. पातीति गोप : तस्येश्वर : शिव :। गोपा : जीवा : तेषामीश्वरः गोप : इति व्युत्पत्या ऽ पि गोपेश्वर :शिव :। एवं हरिहरयो : (विष्णुमहादेवयो :) एकता ऽ
भिन्नतैव स्वीकर्तव्येति कवि र्वदति – स एव हि महादेव :स एव हि महाहरि :। शिवाय विष्णुरूपाय शिवरूपाय विष्णवे। शिवस्य हृदयं विष्णुर्विष्णोश्च हृदयं शिव :। ७७–८ अष्टादशसु महापुराणेषु नैपालकं सांस्कृतिकमितिहासं संसूचयद् हरिहरयोरेकतां प्रस्तुवत् पुराणमेकमेव दृश्यते वाराहपुराणम्। गण्डकीक्षेत्रवर्णनप्रसङ्गे तत्र शैवानां वैष्णवानाञ्च विवादं भेददृष्टिञ्च शममितुं सरला मार्मिकी सृतिः प्रदर्शिता। विष्णुमूलिकाया : कृष्णगण्डक्या : शिवमूलिकाया : त्रिशूलगण्डक्या संगमस्य हरिहरक्षेत्रस्य देवघट्टस्य वर्णने भगवान् वराह : पृथिवीम् , अवोचत – मां विष्णुम् (हरिम्) ,शिवं (हरम्) च भेददृष्ट्या न विलोकय , आवयोरन्तरं नास्ति। अहं शिवश्च एकस्यैव परब्रह्मणो द्वौ विग्रहौ, अभिन्नौ तद्रुपापन्नौ । भगवान् शिवस्य भृगुतुङ्गे (स्यङजा) तपस्यन्तं देवदत्तमुनिमवोचत् – "हे मुने ? पूर्वं त्वया हरिहरयो र्भिन्नता समीक्षिता, अतस्तव तपस्या

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भग्ना , शिवो विष्णुश्चेति द्वावावामेकतापन्नौ, आवयोरन्तरं नास्ति। " वाराहपुराणस्यैतस्यां कथायां लुईटेलमहोदयस्य गोपेश्वरमाहात्म्यवर्णितो हरिहरयोरेकतावादः समाश्रित :। अस्मिन् माहात्म्ये कविना स्वकीयया शैल्या नवीनता – क्षेत्रीयता– किंवदन्तीमूलक कथादय : प्रस्तुता। अत्र रमणीय : शिवविष्णुसंवाद : विष्णो : परामर्शेन शिवस्य नैपालक – पूर्वभागस्य त्रयोदशोपवर्तनप्रदेशगमनम् वहुकालं यावद् भगवत : शिवस्य तत्र निवास : म्याङलुङस्थानस्य सविस्तरं वर्णनम्। गोपेश्वरशिवस्य वहुविधा लीला : ,ब्रह्मविष्णुमहेश्वरधारिकाया : सिंहवाहिन्या वर्णनम् म्याङ्लुङस्थिताया : सिंहदेव्या वर्णनम् सूकररूपमूकदानवाद् अर्जुनं रक्षत : शिवस्य चरितम् किरातरूपशिवेन तपस्यते अर्जुनाय पाशुपतास्त्रप्रदानम् इत्यादयो विषया अत्र सरलमधुर भाषया संक्षेपेण काव्यात्मक शैल्या वर्णिता :। यद्यपि अस्मिन् माहात्म्ये विष्णुना अनुरुद्धस्य शिवस्य पूर्वाञ्चलस्थ – त्रयोदशोपवर्तन (म्याङ्लुङ्) गमनप्रसङ्गे महाकालीत : मेचीं यावत् स्थितानां नैपालकानां प्रसिद्धानां नदी – पर्वत – सरोवर – तीर्थस्थानादीनां वर्णनेन मातृभूमिं प्रति स्थिर – गंभीरभक्तिभाव : प्रदर्शित :, तथापि विशेषोद्देश्यमूलिकानाम् अस्यां कृतौ म्याङ्लुङस्य तेह्रथुममण्डल केन्द्रस्य त्रयोदशोपवर्तन – पत्तनस्य वर्णने कविहृदयं प्रवृत्तम्। यथार्थत : म्याङलुङप्रदेशाश्रिता कृतिरियमिति वक्तुं शक्यते। प्रदेशिक्योजनश्रोतय : सांस्कारिककृत्यानि , स्थानीयदेवताराधनप्रक्रिया– प्रभावादय : पिङ्वा–लम्वा–खुरगङगा–प्रभृतिनदीनां महनीयता , इत्यादयो विषया :कविनाऽत्र मनोहारिशैल्या समुपस्थापिता :। यत्रत्या आदिवासिनः किराता : ,यत्रत्यानि ग्राम–वन–पर्वत– नदीनां नामधेयानि किरात -(लिम्वू) भाषायां सन्ति। तत्प्रदेशीय–तत्तन्नामसमावेशपूर्वकं रचितंमहाकाव्यमिदं पश्चिमाञ्चलवासिनां कृते कौतुकावहं रोचकं मर्मस्पर्शि च विद्यते।

अत्रैकस्मिन्नध्याये कविना तत्वविवेचना प्रस्तुता वर्तते। साधनाचतुष्टयम् , ब्रह्मैक्यवाद :, स्थूल–सूक्ष्मशरीर–पञ्चभूत–शरीरेन्द्रियादिवर्णनम् ,गीतोक्तसाङ्ख्यदर्शनधारा इत्यादय : समीक्षिता विवेचिता : सन्ति। शिवकेशवयो : मानरूपेण आराधना कर्तव्या इति सिद्धान्तयत :रुद्राध्याया : (सहस्रशीरेषा : , आशु : शिशान :, विभ्राड्वृहत् ,नमस्ते , इति मन्त्रप्रारब्धा अध्याया :) वैदिकसंस्कृतभाषात : लौकिकसंस्कृतभाषायां रूपान्तरिता :। एतावद रूपान्तरात्मिका , अद्य यावद् नक्वापि दृष्टा। रूपान्तरणे उल्लेख्या सरलताऽस्ति। एकम् उदाहरणमं दृश्यताम् "यामिषुं गिरिशन्त हस्ते विभर्ष्यस्तवे। शिवां गिरित्र ताङ्कुरु मा हिंसी : पुरुषवञ्जगत्। " -यजु : १६/३) "हे गिरिशन्त ? यं बाणं क्षेप्तुं धारयसे भुजे। सुखदं कुरु तं शम्भो ? मा हिंसी : पुरूषं जगत् "। (९। ७४)

अन्तिमे ऽध्याये कविना सामाजिकीं व्यवस्थां सुदृढां गतिशीलांच विधातुं मानवीया चरित्रशीलता नीत्युपदेशपूर्वकं प्रस्तुता। अन्तत :सविश्वासं कृतिमिमां प्रदाय मम सम्मतिमभ्यर्थयते कविवराय श्रीलोकनाथलुइटेलमहाभागाय ससौहार्द शतश :साधुवादान् समर्प्य विरमामि। ॐ शान्ति :।

डा. टीकाराम पन्थ
प्राज्ञ– नेपाल राष्ट्रिय प्रज्ञा प्रतिष्ठान
२०६१

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यत्किञ्चित्

तमोरि-कौशिकी-कूल-कुलजेन द्विजन्मना ।
श्रीलोकनाथ-विदुषा पण्डितेन सुवन्धुना ॥
॥ १ ॥
विविच्य वाङ्मयं प्राज्यं भगवद्-भक्ति-भासुरम् ।
श्रीगोपेश्वर-माहात्म्यं कलितं कममुत्तमम् ॥
॥२॥
नगराज-हिमालस्य दुहिता, हित-काशिनी, ।
गौरी, दीव्यत्यत्र सह- प्रियेण सिंहवाहिनी ॥
॥ ३ ॥
वन-शैल-नदी-स्रोतस्सरित्-प्रस्रव-मालिनी ।
नेपाल-जननी यत्र भ्राजते शस्य-शालिनी ॥
॥४॥
धन्येयं धरणी, सौम्या , जल-स्थल-नभश्चरैः ।
अविश्रान्तमवाधं च गीयते भास्वरैः स्वरैः ॥
॥५॥
पुराणोपनिषद्-वेद-मन्त्रैः ,तत्व-विशारदैः ।
तपःस्वाध्याय-निरतैरनुष्ठान-परायणैः ॥
॥६॥
आशु-तोषः, शिवो ,रुद्रो ,यत्र गोपेश्वरो ऽव्ययः ।
सर्वेश्वरो , महादेवो ,विराडाराध्यते मखैः ॥
॥७॥
समाकलय्य, गोपेश-माहात्म्यं , ललितं, शिवम्,
सत्यं भक्तवरो लोकनाथः, श्लाध्याः कवि सुधीः ॥
श्रद्धाऽऽस्तिक्य-सदाऽऽचार-श्रुति-सार-समन्वितम्,
श्रीगोपेश्वर-माहात्म्यं, जायतां श्रेयसे सताम् ॥
सृष्टि-स्थिति-लयै-र्योऽयं लीलया क्रीडति, प्रभुः,
तं दुरत्ययमाहात्म्यं गोपेशं सन्नता वयम् ।
प्रौष्ठपदी पूर्णिमा

प्राध्यापक :- टीकाप्रसाद शर्मा
सन्मार्ग-सदनम्-धरान - १६
कौशिकी- प्रदेशः (नेपाल)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पत्रं पुष्पम्

समीपे ग्रामदेवानां म्याङ्लुङ्नगरवर्तिनाम् ।
गुफाशैलगतं देवं गोपेश्वरमहं भजे ॥१॥
लम्बु-पिङ्गवा-खुरुङ्गाख्या वहन्ति सरितः सदा ।
क्षालिता पृथिवी याभिः सूते हरितमालिकाम् ॥२॥
गोपेश्वरस्य माहात्म्ये वेदोपनिषदां तथा ।
नानाविधानां शास्त्राणां साररूपो विलोक्यते ॥३॥
यत्र चैकादशाध्यायै र्वर्णिता सरला कथा ।
गोपेश्वरस्य भक्तानां हरते मानसीं व्यथाम् ॥४॥
क्वचिद् वेदगतानां च पुराणानामपि क्वचित् ।
मन्त्राः श्लोकाश्च दृश्यन्ते क्वचिद् गीतागता अपि ॥५॥
सदाचारस्य सरणिर्देवाराधनपद्धतिः ।
प्रदर्शिता समासेन भाषायाः सरला गतिः ॥६॥
यत्र गोपेश्वरो देवो राजते भूधरेश्वरः ।
भाग्यवन्तो जनास्तत्र जातं तेषां तु किं तपः ? ॥७॥
कालीमाटी तथा सोल्मा पिप्लेग्रामगता नराः ।
गोपेश्वरस्य कृपया सुराराधनतत्पराः ॥८॥
नेपालजननी धन्या यत्र गोपेश्वरो हरः ।
मन्दिरं यत्र रुद्रस्य सोऽपि शैलेश्वरो वरः ॥९
गोपेश्वरस्य माहात्म्यमेतद् येन प्रकाशितम् ।
काव्यमार्गानुसारेण भवबान्धवभाषया ॥१०॥
वेदवेदान्तविद् विप्रो सदाचारपरायणः ।
लुइँटेलोपनामासौ लोकनाथः प्रशस्यते ॥११॥

कृष्णप्रसाद शर्मा बस्ती
इतिहासपुराणसाहित्याचार्य, एम. ए.
सहप्राध्यापकः, धनकुटा - ६
वालाचतुर्दशी
मार्ग- १६,२०६१ ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सुकामना

संस्कृते रूपान्तरिता

आदरणीय ! कविवर ! खेमनाथ निरौला महोदय !

सादरमभिवादये ।

भवतः संस्कृतरचना मयावलोकनादाध्यात्मिक-देशभक्ति-संस्कृतप्रेमभिर्विभूषिताऽस्तीति लब्धा । आवयोः सहवासेन वचनादानप्रदानेन च परिमार्जनादियं सार्थकोद्देश्या सहृदयग्राह्या सुललिता भविष्यतीति मन्ये । इयं रचना गोपेश्वरप्रसादात् सुखशान्त्यैश्वर्यप्रदा भगवद्भक्तिसिद्धिप्रदा च भवतु , इत्यहं कामये । किमधिकम् । धन्यवादः ।

सदा स्मरणकर्ता

मुकुन्दशरण उपाध्याय

अध्यक्ष

सनातन धर्म सेवा समिति

केन्द्रीय कार्यालय काठमाण्डौ

२०५७ । ६ । १६ ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शुभाभिशंसनम्

हिमालयस्य भुजान्तरावस्थितविश्वैकमात्रहिन्दुराष्ट्रनेपालो विभिन्नदेवानां देवीनामुत्पत्तिस्थानं क्रीडास्थलं चास्ति। अयं देशः आराध्यदेवानां पशुपतिनाथ-मुक्तिनाथ-पिण्डेश्वर-जलेश्वर-हलेश्वर-तिलेश्वर-गोपेश्वरादिदेवानां मनकामना-गुह्येश्वरी-दक्षिणकाली-भद्रकाली-दन्तकाली-प्रस्थभरा-सिंहदेवीनामनेकदेवीदेवानां विराजमानत्वेन सप्तकौशिकी-सप्तगण्डकी-सप्तकर्णालीभिरनेकनदनदीभिः सिञ्चितेन पवित्रतमा देवभूमिः मन्यते। विद्वद्वरेण निरोलेत्युपनामधेयेन त्रयोदशोपवर्तनमण्डलान्तर गतपिप्पलेग्रामनिवासिना खेमनाथेन प्रारभ्य लुइटेलोपनामधेयेन लोकनाथेन साङ्गोपाङ्गपूरितं पिप्पलेदेवखातविलस्थगोपेश्वरमहादेवस्य माहात्म्यं वैदिकसनातनधर्मावलम्बिनामग्रे स्थापयित-ुमध्ययनमनुसन्धानं च विधाय विभिन्न- छन्दःप्रयोगं कृत्वा संस्कृत भाषायां पौराणिक शैल्या सूत-शौनक-व्यास-शुक-नारद-बहुलाश्व-युधिष्ठिरार्जुनेन्द्रादीनां संवादपूर्वकं प्रश्नोत्तररूपेण रचितमिदमवलोक्य प्रसन्नोऽहं जातः। अस्मिन् नेपालस्य धार्मिकसंस्कृतेश्चाभ्युन्नतिर्विश्वस्मिन् परिचिता भविष्यतीति मन्ये। अत्रः माहात्म्ये नेपाली भाषायां प्रयुज्यमानानां संस्कृततत्समशब्दानामधिकतमप्रयोगेन प्रासादगुणसमलङ्कृता सरलाभाषाऽर्थवोधाय पाठकवृन्देभ्यो दुरूहा न वर्तते। हरिद्वार-वृन्दावनेत्यादिस्थानवर्णनेन स्मरणेन चास्य माहात्म्यस्योत्कृष्टता प्रशंसनीयैवेति। अन्यान्यपि प्रस्थेश्वर-गुप्तेश्वर-तिलेश्वरादीनां माहात्म्यं विस्तारयिष्यत इति कामयन् कविद्वयाय साधुवादं समर्पयामि।

प्रा. नारायणप्रसाद कट्टेल
महेन्द्र संस्कृत विश्वविद्यालयाङ्ग
पिण्डेश्वर विद्यापीठस्य धरानम्
२०६१ फाल्गुण कृष्णैकादशी

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

किञ्चिन्निवेदनम्

नाहं शास्त्रपारङ्गत :, नाहं काव्यप्रतिभायुक्त : । केवलं गुरुमुखनि:सृतव्याकरणकाव्यकोषाल्पाम्बुकणान् गृहीतवानस्मि । सतीर्थ्येन खेमनाथ निरौलामहोदयेन जन्मभूमिस्थानेकदेवीदेवतानदीनां तीर्थीभूतगोपेश्वरस्य च महिमालेखनाय कानिचित् पद्यानि लिखित्वा तथ्यभावसंकलनं च विधायप्रेरित सन् केनचिद्हृदिस्थितेन देवेनोद्बोधितो ऽहं मातृभूमिं जीवाधिपतिं परमात्मनं नारायणं चोद्दिश्य वेदोपनिषद् भागवतादिशास्त्रसारोद्धरणं कुर्वन् काञ्चन शब्दान् गुम्फितवानस्मि च्छन्दसि । अस्मिन् माहात्म्ये प्रसङ्गवशात् शब्दसुमनै : सुपूजिता देवा देव्यो मातरश्च तत्तत्स्थाननिवासशीलस्य जीवाधिपते र्गोपेश्वस्य (नारायणस्य) महिमाविस्तारं लोककल्याणं च कुर्वन्तु , इत्येतदेवाहं कामये । अस्यांरचनायां प्रमादात् वाऽज्ञानात् त्रुटयो विपरीताभिव्यक्तयश्च वह्व्य : सन्ति । तासां भगवत्कृपाविष्टसज्जना व्याकरण-काव्य -कोषालङ्कार-रससमलङ्कृतरचनाकुशला विद्वांसश्च संस्काराय प्रेरयन्तु मां क्षमां च कुर्वन्तु । अस्यां रचनायां संम्मतिं दत्वासहयोगप्रदान्समादरणीय डा. टीकाराम पन्थी (प्राज्ञ-ने.रा .प्र .प्र.) महोदयान्,श्री..टीकाप्रसाद शर्मा (प्राध्यापक महेन्द्र विश्व विद्यालय) , डा. श्रीकृष्णप्रसाद वस्ती (सहप्राध्यापक त्रि.वि.वि. श्री मुकुन्दशण उपाध्याय गुरुमहोदयान्, माहात्म्यश्रवणं विधाय लीपिं च सम्पाद्य सहयोगप्रदान् सहृदयान् शुभेच्छून् श्री..दीपक पराजुली (व्याकरणाचार्य) एवं रचनामवलोक्य प्रोत्साहप्रदान् डा.तुलसी प्रसाद भटराई, स.प्रा. श्री रमेश घिमिरे साहित्याचार्य पं काशीनाथ कटेल (संस्थापकः पशुपतिसंस्कृत मा.वि. दमक) पं. हेमन्त अर्याल, पं. हरिराज वराल. श्री पं.चन्द्रप्रसाद कटेल श्री दामोदर दाहालश्च.......सर्वानेतान् हृदाभिवादये । किमधिकम् ।

कार्येषु विहितेष्वेव त्रुटय : संभवन्ति हि ।
हसन्तीर्ष्यालवस्तत्र सुधारयन्ति सज्जना : ॥१॥

शम् विदुषामनुचर :

सेवकः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लेखकद्वय श्री खेमनाथ निरौला र श्री लोकनाथ लुइंटेलद्वारा संस्कृत वाङ्मयमा रचित गोपेश्वर शिव माहात्म्य तेह्रथुम जिल्लामा प्रकाशित संस्कृत भाषाको प्रथम धार्मिक ग्रन्थको रूपमा देखिएको छ । नेपालका विभिन्न जिल्लास्थित देवस्थल, मन्दिर, नदी, नाला, ताल, पोखरी समावेश गरी विभिन्न छन्दमा लेखिएको यस माहात्म्यमा खास गरी तेह्रथुम जिल्ला अन्तरर्गत पिप्ले गा.वि.स. स्थित श्री गोपेश्वर शिवजी र म्याङलुङ्ग बजार स्थित सिंहदेवीको किंवदन्ती अनुसारको प्राकाट्यतालाई धार्मिक सहिष्णुता अभिवृद्धि गर्ने उद्देश्यले लेखकद्वयले लेख्नुभएको पाइयो । लेखकहरुको लेखन प्रयासको सह्रना गर्दै धर्मानुरागी, इतिहासविद र पुराणविदहरुकोलागि यो माहात्म्य महत्वपूर्ण हुने कुरामा विश्वस्त छु । साथै नववर्ष २०६२ को शुभ उपलक्ष्यमा सम्पूर्ण जिल्लावासीहरुको सुख, शान्ति तथा समृद्धिको लागि हार्दिक मंगलमय शुभकामना व्यक्त गर्दछु ।

(विनोद खनाल)
प्रमुख जिल्ला अधिकारी
तेह्रथुम

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शुभ कामना

लेखकद्वय श्री खेमनाथ निरौला र श्री पं. लोकनाथ लुइटेलद्वारा रचित गोपेश्वर शिव माहात्म्यले संस्कृत भाषामा माहात्म्य लेखिने परम्परालाई निरन्तरता दिन सकेको छ । गोपेश्वर शिवजीको स्थापना, सिंहदेवीको उत्पत्ति तथा जिल्ला भित्रका नदी, पोखरी आदिको वर्णन संस्कृत भाषामा छन्दोवद्ध रूपमा देख्न र सुन्न पाउँदा यस सनातन धर्म सेवा समिति जिल्ला शाखा तेह्रथुमबाट लेखकद्वयलाई नै पुनरपि यस्तै धार्मिक रचना गर्न समेत क्षमता देवदेवीले प्रदान गरून् भन्ने कामना गर्दै धन्यवाद प्रदान गर्दछ ।

०६२।१।५

(जयनारायण ढुङ्गाना)
अध्यक्ष
सनातन धर्म सेवा समिति
तेह्रथुम

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दर्ता नं ०४९।५०।१२

श्री राधाकृष्ण गुफा मन्दिरस्य संस्थापका: (२०४०)

१) श्री गोविन्दशरण सन्त (नारद)	–	पिप्ले गुफा
२) श्री दीनप्रसाद निरौला (महाजन)	–	पिप्ले ४
३) पं - तुलसीप्रसाद घिमिरे	–	पिप्ले २
४) श्री बद्रीनारायण श्रेष्ठ	–	म्याङलुङ, तेह्रथुम
५) श्री त्रैलोक्यनाथ निरौला	–	पिप्ल २
६) श्री गंगाप्रसाद निरौला	–	पिप्ले २
७) श्री गोविन्दप्रसाद दाहाल	–	पिप्ले २
८) श्री खेमनाथ निरौला	–	पिप्ले ४
९) श्रीमती रुक्मिणी ढुंगाना	–	म्याङलुङ ६
१०) श्रीमती गंगादेवी निरौला	–	पिप्ले ४
११) श्री गुरुप्रसाद निरौला	–	पिप्ले २
१२) श्री धर्मानन्द अधिकारी	–	सोल्मा
१३) सन्तबहादुर खड्का	–	सोल्मा
१४) डमरुबल्लभ भट्टराई	–	पिप्ले ४
१५) तारानिधि निरौला	–	पिप्ले ३
१६) देउदत्त कोइराला	–	पिप्ले २
१७) लक्ष्मीप्रसाद तिम्सिना	–	पिप्ले २
१८) देवीप्रसाद कोइराला	–	पिप्ले २
१९) भारतादेवी निरौला	–	पिप्ले २

शिवालयस्य स्थापनापश्चात् संरक्षणसमिते: संगठनम्

तदर्थसमिति:

१) अध्यक्ष	:-	श्री भोलानाथ ढुंगाना	–	पिप्ले ६
२) उपाध्यक्ष	:-	श्रीगुरुप्रसाद निरौला	–	पिप्ले २
३) सचिव	:-	श्री खेमनाथ निरौला	–	पिप्ले ४
४) सहसचिव	:-	श्री दाताराम निरौला	–	पिप्ले २
५) कोषाध्यक्ष	:-	श्री भोलानाथ निरौला	–	पिप्ले ४
६) सदस्य	:-	श्री त्रैलोक्यनाथ निरौला	–	पिप्ले २
७) सदस्य	:-	श्री युवराज गड्तौला	–	पिप्ले ५

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

८) सदस्य	:-	श्री चूडामणि दाहाल	-	पिप्ले २
९) सदस्य	:-	श्री रामगोपाल घिमिरे	-	पिप्ले २
१०) सदस्य	:-	श्री सोमनाथ निरौला	-	पिप्ले २
११) सदस्य	:-	श्री मानध्वज खत्री	-	पिप्ले ८
१२) सदस्य	:-	श्री पूर्णप्रसाद बजगांई	-	पिप्ले ९
१३) सदस्य	:-	श्री ज्ञानवहादुर खत्री	-	पिप्ले ७
१४) सदस्य	:-	श्री चन्द्रप्रसाद दाहाल	-	पिप्ले १
१५) सदस्य	:-	श्री रामकृष्ण खड्का	-	पिप्ले ३

वर्तमानः संरक्षणः समितिः

१) अध्यक्ष	:-	श्री खेमनाथ निरौला पिप्ले -४
२) उपाध्यक्ष	:-	श्री जयप्रसाद ढुङ्गाना म्याङ्लुङ- ६
३) सचिव	:-	श्री गौरीशंकर निरौला पिप्ले - ६
४) कोषाध्यक्ष	:-	पं. महेन्द्रप्रसाद निरौला पिप्ले-३
५) सदस्य	:-	श्री त्रैलोक्यनाथ निरौला पिप्ले -२
६) सदस्य	:-	श्री गङ्गाप्रसाद निरौला पिप्ले-२
७) सदस्य	:-	श्री धर्मानन्द अधिकारी सोल्मा
८) सदस्य	:-	श्री गोविन्दशरण दाहाल पिप्ले २
९) सदस्य	:-	श्री गोविन्द ढुङ्गाना म्याङ्लुङ् ६
१०) सदस्य	:-	श्री रामकृष्ण खड्का पिप्ले ३
११) सदस्य	:-	श्री भवानी गड्तौला पिप्ले ५
१२) सदस्य	:-	श्री खगेन्द्र निरौला पिप्ले २
१३) सदस्य	:-	श्री मानध्वज खत्री पिप्ले ८
१४) सदस्य	:-	श्री चूडामणि दाहाल पिप्ले २
१५) सदस्य	:-	श्री केवलराम दाहाल पिप्ले २
१६) सदस्य	:-	स्थानीय वन उपभोक्ता समिति अध्यक्ष एवं सचिव पदेन सदस्य
१७) सदस्य	:-	श्री ज्ञानवहादुर खत्री पिप्ले ७
१८)सदस्य	:-	श्री शेरवहादुर भण्डारी जरिखिम्ती १
१९) सदस्य	:-	श्री खेमनाथ निरौला पिप्ले १
२०) सदस्य	:-	श्री पूर्णप्रसाद बजगांई पिप्ले ९

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रीगोपेश्वरमाहात्यत्म्यम् प्रारम्यते।

प्रथमोध्यायः।

हेशम्भो ! करुणानिधे ! सुरपते ! हे पार्वतीवल्लभ ! ॥
हे विष्णुप्रिय ! धूर्जटे ! पशुपते ! गङ्गाधर ! त्र्यम्वक ! ॥
हे मृत्युञ्जय ! शंकर ! त्रिनयन ! श्रीकण्ठ ! ईश ! प्रभो ! ।
हे गोपेश्वर ! पाहितान् प्रतिदिनं पादारविन्देरतान् ॥१॥
नैमिषे परमे पुण्ये धर्मशास्त्रार्थपारगाः।
मिलिता मुनयस्तत्र सत्यव्रतपरायणाः ॥२॥
तस्मिन् धर्ममये क्षेत्रे ऋषयः शौनकादयः।
लोकानां हितमिच्छन्तो महासत्रं वितेनिरे ॥ ३ ॥
व्यासशिष्यो महाज्ञानी वेदवेदान्तपारगः ।
तत्राजगाम तान्द्रष्टुं महापौराणिकोमुनिः ॥४॥
ततो विनयसंयुक्ताः प्रसन्ना मुनयस्तदा ।
प्रोचुः साञ्जलयः सूतमुच्चासने स्थितं मुनिम् ॥५॥

शौनक उवाच

इतिहासपुराणनि व्यासात्सर्वाण्यधीतवान् ।
अस्मान्सूत महाभाग तेषां सारं प्रबोधय ॥६॥
इतिहासं श्रुतं सर्वं पूर्वमेवशुभाशुभम् ।
न तृप्तिमधिगच्छामः श्रवणेच्छामुहुर्मुहुः ॥७॥
इदानीमेकमेवास्ति श्रोतव्यं सूत सन्मते ! ।
तद्रहस्यमपि ब्रूहि यदि तेऽनुग्रहोभवेत् ॥८॥
प्राप्ते कलियुगे घोरे नराः पुण्यविवर्जिताः ।
दुराचाररता मूढाः सत्यवार्तापराङ्मुखाः ॥९॥
परस्मै दुःखदातारः परद्रव्याभिलाषिणः ।
परस्त्रीसक्तमनसः परहिंसापरायणाः ॥१०॥
मातृपितृकृतद्वेषा नास्तिकाः पशुबुद्धयः ।
मदिरामांसधूमानां भक्षकाः परवञ्चकाः ॥११॥
विप्रक्षत्रियविट्शूद्राः स्वधर्मत्यागशीलिनः ।
असत्सङ्गः पापरताश्चौरवृतिपरायणाः ॥१२॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एतेषां नष्टबुद्धीनां स्वधर्मत्यागशीलिनाम् ।
इहलोके परे लोके कथं सूत गतिर्भवेत् ॥१३॥
दृष्ट्वैतान् मानसे दुःखं जायते सततं हि नः ।
परोपकारसदृशो नास्ति धर्मोऽपरः खलु ॥१४॥
लघूपायेन येनैषां भवेत्सद्योऽघनाशनम् ।
वेदवेदान्तसारं हि कृपया तद्वदाधुना ॥१५॥
क्षणं स्वासं निरुध्यैव ध्यानमिलितलोचनः ।
उवाच परमप्रीतो वेदसारं विचिन्तयन् ॥ १६ ॥

सूत उवाच

विघ्नेश्वराय सुखदाय विनायकाय
लम्बोदराय विकटाय गजाननाय ।
गौरीसुताय भवबन्धनभञ्जनाय
तस्मै नमो भगवते शिवनन्दनाय ॥ १७॥
आदिदेवो जगन्मित्रः प्रभाकरो दिवाकरः
कर्ता भर्ता च हर्ता त्वं सूर्यदेव नमोस्तुते ॥१८॥
कात्यायनि महामाये हे गौरि परमेश्वरि ।
हे दुर्गे चण्डिके मातर्वाक्शुद्धिं मे विधीयताम् ॥१९॥
कृष्णाय वासुदेवाय चतुर्भुजाय विष्णवे ।
दामोदराय देवाय केशवाय नमोनमः ॥२०॥
नन्दीश्वराय देवाय पार्वतीसहिताय च॥
मृत्युञ्जयाय शर्वाय शिवाय सततं नमः ॥२१॥
शौनक श्रावयिष्ये ऽहं संवादं शुकव्यासयोः ॥
शुकं सम्बोधयन् व्यासः शास्त्रसारमुवाच ह ॥२२॥
एकदा वेदमध्येतुमगमत् व्याससन्निधिम् ।
संवादं श्रुतवान् तत्र रोचकं नीतिसम्मतम् ।
शुकः पप्रच्छ तत्रैकं प्रश्नं लोकोपकारकम् ॥२३॥

शुक उवाच

भो पित र्वद निश्चित्य को देवो मोक्षदायकः ।
ब्रह्मविष्णुशिवेष्वेकः सर्वपापविनाशकः ॥२४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

व्यास उवाच

एकदा ब्रह्मणः पौत्रो दक्षो नाम प्रजापतिः ।
वृहस्पतिसवं[1] नाम समारेभे क्रतूत्तमम् ॥२५॥
आह्वयामास तस्मिन् स सर्वान् देवानृषींस्तथा ।
सतीं देवीं शिवं त्यक्त्वा यक्षगन्धर्वकिन्नरान् ॥२६॥
तत्रागता श्रृणोन्निन्दां पत्युः पितृकृतां तदा ॥
सा च तदङ्गजं देहं तत्याज ब्रीडिता सती ॥२७॥
छेदयित्वा शिरस्कस्य[2] वह्नौ जुहाव कोपितः ॥
ब्रह्मप्रभृतिभिर्देवैः पश्चात् सन्तोषितः शिवः ॥२८॥
सन्धीयमाने शिरसि वस्तस्य[3] रुद्रवीक्षितः ।
दक्षः सुप्त इवोत्तस्थौ सम्परेतां सुतां स्मरन् ॥२९॥
शिवाबलोकनात्सोऽभूत्सरद्ह्रद इवामलः ॥
पश्चात्तापेन संतप्तो निर्व्यलीकेनं चेतसा ॥३०॥
ववन्दे स्तुतिवाक्येन प्रसन्नोऽभूत् शिवस्तदा ॥
शिवप्रेरणया दक्षो यज्ञपूर्णं चकार ह ॥३१॥
प्रादुर्बभूव यज्ञे ऽस्मिन् भगवान् यज्ञभागभुक् ॥
दक्षं बभाष आभाष्य प्रियमाण इवानघ ॥३२॥

श्रीभगवानुवाच

अहं ब्रह्मा च शर्वश्च जगतःकारणं परम् ।
आत्मेश्वर उपद्रष्टा स्वयं दृगविशेषणः ॥३३॥
आत्ममायां समाविष्य सोऽहं गुणमयीं द्विज ॥
सृजन् रक्षन् हरन् विश्वं दधे संज्ञां क्रियोचिताम् ॥३४॥
तस्मिन्ब्रह्मण्यद्वितीये केवले परमात्मनि ॥
ब्रह्मरुद्रौ च भूतानि भेदेनाज्ञोऽनुपश्यति ॥३५॥
यथा पुमान् न स्वाङ्गेषु शिरःपाण्यादिषु क्वचित्॥
पारक्यबुद्धिं कुरुत एवं भूतेषु मत्परः ॥३६॥

१. ज्ञानयज्ञ २. दक्षप्रजापति ३. वोकाको

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

व्यासउवाच

त्रयाणामेकभावानां यो न पश्यति वै भिदाम् ॥
सर्वभूतात्मनां ब्रह्मन् स शान्तिमधि गच्छति ॥३७॥
वन्दे नारायणं देवमद्वैतं ब्रह्मसंज्ञितम् ॥
ब्रह्मविष्णुशिवा यस्य गुणानुरूपमूर्तयः ॥३८॥
वेदेषु वर्णितो देवो नारायणः शिवः स्मृतः॥
विष्णुर्नारायणः प्रोक्तः मोक्षदः पापनाशकः ॥३९॥
ब्रह्मा विष्णुः शिवः शक्रः कालो विशिष्टशक्तिमान् ।
नारायण इति ह्येक उपनिषदि वर्ण्यते ॥४०॥
कीर्तनादेव देवस्य सर्वपापैः प्रमुच्यते ॥
रुद्रो नर उमा नारी तस्मै तस्यै नमो नमः ॥४१॥
रुद्रो विष्णुः ,उमा वाणी तस्मै तस्यै नमो नमः - **उपनिषत्** ॥

केशवं वा शिवं सौम्यः भज शुद्धेन चेतसा ॥४२॥
देवो नारायणस्तुभ्यं मोक्षं ददाति निश्चयः ॥
जन्मजन्मान्तरे सन्ति कृतानि वृजिनानिच ॥४३॥
प्रसादात्तस्य नश्यन्ति ह्येष शास्त्रस्य निर्णयः॥
यत्र गोपेश्वरो देवो राजते दिव्यमन्दिरे ॥४४॥
सिद्धिः स्याद् व्रततीर्थानां तत्र तस्यैव दर्शनात् ॥
गोपेश्वरं समर्चन्ति ये नरा श्रद्धयान्विताः ॥४५॥
ते प्राप्नुवन्ति संसिद्धिं स्नानदानादिकर्मणाम् ॥४६॥

सत्वं रजस्तम इति प्रकृतैर्गुणास्तै
र्युक्तः परःपुरुष एक इहास्य धत्ते ॥
स्थित्यादये हरिविरञ्चिहरेति संज्ञाः
श्रेयांसि तत्र खलु सत्वतनोर्नृणां स्युः ॥४७॥ - भागवतम्

इति श्री गोपेश्वरमाहात्म्ये व्यासशुकसंवादे आराध्यदेवनिर्णयो नाम प्रथमोऽध्यायः ॥१॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रथम अध्यायको सारांश

विद्याकामः शिवं यजेत् भन्ने भागवत् प्रमाण अनुसार ग्रन्थ रचना एवं माहात्म्य सिद्धिकोलागि शिव वन्दना शार्दूलविक्रीडित छन्दमा गरिएको छ । कथा नैमिषारण्य नामगरेको पवित्र स्थानमा ब्रतनिष्ठ, धर्मशास्त्र पारङ्गत ऋषिहरू भेला भएका थिए । शौनक ऋषिको अगुवाइमा लोककल्याणको इच्छा गरेर ठूलो यज्ञ गरे । त्यसमा व्यास शिष्य पौराणिक सूत आउनु भयो । सबैले सत्कार सम्मान गरे त्यस पछि शौनकले सोधे - हे सूत ! तपाई धेरै शास्त्रको मर्मज्ञ हुनुहुन्छ । कलियुगी पुण्यवर्जित मानिसहरूको पर मकल्याण कसरी हुन्छ ? स्त्री–शूद्र सबैले साधिकार वेदार्थ पढेर वेद उपनिषद् धर्मशास्त्रमा वर्णन् गरिएका पुरषोत्तमको ध्यान्गरी आत्माको उद्धारगर्ने सरल उपाय के हो ? भन्नुहोस् । यस्तो प्रश्नको उत्तरमा सूतद्वारा विघ्नविनाशक गणेश संसार उज्यालो पार्ने सूर्य, संसारको तत्तद् व्यवस्था गर्ने शक्तिदेवी, अर्थ काम मोक्षदिने विष्णु, रोग व्याध अकाल मृत्यु नाशगर्ने शिव एउटै परमेश्वरका पञ्चशक्ति स्वरूपको ध्यान गरेर भागवत्कोप्रसङ्ग व्यास र शुक संवादको उल्लेख गरिएको छ । एक दिन ब्रह्माका नाति दक्ष प्रजापतिले वृहस्पतिसव नामको यज्ञ गरे । दक्षले प्रथम पुत्री सती ब्रह्माको प्रेरणाद्वारा शिवलाई दिएको थियो । दक्षको शिवसँग वैरभाव भएको थियो । यज्ञमा सबै देवताहरू वोलाइएका थिए । शिवलाई वोलाइएको थिएन । बाबुका घरमा यज्ञ हुने सुनेर सतीदेवी आइन् । सतीले त्यहाँ पतिशिवको निन्दा सुनेर दक्ष (पिता) सँग सम्बन्धित् शरीर त्यगिदिइन् । अपमान् र पत्नी वियोगले क्रुद्ध भएका शिवद्वारा दक्षको शिर अग्निमा होमियो । देवतामा हाहाकार भयो । ब्रह्मादि देवताहरूद्वारा बन्दना गरेर शिवलाई प्रसन्न गराए । शिवले बाखाको टाउको जोडेर बचाउनु भयो । दक्ष प्रजापति विउँझिएर पश्चाताप गर्दै शिवको आराधना गरे । शिवको प्रेरणाद्वारा ऋषिहरूलेदक्षको यज्ञ पूर्ण गरे । यज्ञ पुरूष परमात्मा प्रसन्न हुनुभयो र प्रकट भएर भन्नुभयो । हे दक्ष ! विष्णु ब्रह्मा र शिव म एउटै हूँ । सृष्टि पालन् र संहारको लागि ततद् गुण अनसारको नाम धारण गरेको हो । जस्तै शिर गोडा हात् आदि अंग अलग्ग भए पनि व्यक्ति एउटै हुन्छ । त्यस्तै गुण कर्मानुसार भिन्न स्वरूपको भए पनि एउटै हूँ । एउटाको अपमान् गर्दा सबैको अपमान् हुन्छ । नारायण गोपेश्वर हूँ । शुद्ध सत्वगुणमय रूप एउटा गोपेश्वर नारायण मै हूँ । व्यासले शुकमुनिलाई दिएको सिद्धवचन यही हो । गोपेश्वरको आराधना गर्नाले इहलोक र पर लोकमा पनि परमकल्याण हुनेछ । इति आराध्यदेव निर्णय नाम प्रथम अध्याय ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अथ द्वितीयोऽध्यायः

शौनकउवाच

कोऽसौ गोपेश्वरो देवः कुत्रास्ति तस्य मन्दिरम् ॥
को विधिः किं फलं तस्य पूजनाल्लभ्यते नरैः ॥१॥

सूत उवाच

एकदा भारते वर्षे गङ्गातीरे विशेषतः ॥
देवसभाऽभवन्मायापुर्यामाश्चर्यवर्धिनी ॥२॥
आसन्नुपस्थितास्तत्र ब्रह्मविष्णुशिवादयः ॥
विविधा देवता देव्यः साधवःकोटिसंख्यकाः ॥३॥
लोकानां हितमिच्छद्भिरज्ञानोपहतात्मनाम् ॥
देवैः कृतं महद्दिव्यं विचाराणां विमर्षणम् ॥४॥
अवतारो ग्रहीतव्य ऐक्यमतेन निश्चितः॥
भूभारहरणायैव ब्रह्मा विष्णुमुवाच ह ॥५॥

ब्रह्मोवाच

कंशेनाऽधर्ममित्रेण सदाचाराः विनाशिताः ॥
अतः पापरता जीवा जाता नरकगामिनः ॥६॥
तेषामुद्धरणार्थाय लीलामानुषविग्रहः ॥
कीडां कुर्वन् दयानाथ भूभारहरणं कुरु ॥७॥

श्रीविष्णुरुवाच

ब्रह्मन् महेश हे देवाः सर्वे स्युः कृतनिश्चयाः ॥
अवतीर्यैकरूपेण साहाय्यं मे विधीयताम् ॥८॥
नेपाले भारते वर्षे सर्बत्र दिव्यमन्दिरे ॥
संस्थाय ह्येकरूपेण भक्तान् रक्षत सर्वदा ॥९॥

सूत उवाच

विसृज्य तां सभां देवा गताःसर्वे स्वधामनि ॥
कृष्णरूपावताराय योजना विष्णुना कृता ॥१०॥
अवतीर्य यदोर्वंशे कृष्णो नारायणो हरिः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चकार विविधां कीडां रासलीलामनेकशः ॥११॥
राधिकाब्रजकन्याभिः सह बृन्दावनेश्वरः ।
दिव्यामलौकिकीं कृत्वा रासलीलां मुमोद ह ॥१२॥
एकदा मिथिलां प्राप्तो देवर्षिःपृथिवीं भ्रमन् ॥
बहुलाश्व :प्रसन्नोऽभूत् लब्ध्वा तं नारदं मुनिम् ॥१३॥
राजा पप्रश्छ देवर्षिं श्रीकृष्णचरितामृतम् ॥
उवाच परमप्रीतःस्मरन् लीलारसामृतम् ॥१४॥

नारद उवाच

प्रयागं पुष्करं काशीं श्रीरङ्गं सेतुवन्धनम् ॥
तीर्थेषु भ्रमणं कुर्वन् एवं वृन्दावनं गत : ॥१५॥
तत्राहं दृष्टवान् राजन् ध्याने विवेकचक्षुषा ॥
श्रीकृष्णं परमानन्दमद्वैतं ब्र्ह्मसंज्ञितम् ॥१६॥
रासलीलां प्रकुर्वन्तं गोविन्दं पुरुषं परम् ॥
रात्रीं षाण्मासिकीं कृत्वा यशोदानन्दनन्दनम् ॥१७॥
कृष्णस्य देवतास्तत्र रासलीलां दिदृक्षव : ॥
उमामहेश्वरौ देवावासुरिर्मुनिसत्तमः ॥१८॥
श्रीकृष्णदर्शनासक्ताः सर्वे सुराः समागताः ॥
आसन् प्रवेशमार्गेऽस्मिन् गोपिकाः द्वारपालिकाः ॥१९॥

द्वारपालिका ऊचुः

विप्रौ ? वृन्दावनं सम्यक् परितो रासमण्डलम् ॥
कृष्णाज्ञयैव रक्षामो विनिद्रा निर्भया : वयम् ॥२०॥
कृष्ण एवैकपुरुषो वर्तते रासमण्डले ॥
गोपीभावं विनाकैश्चित्तत्र गन्तुं नशक्यते ॥२१॥
स्नानमाचर्यतां देवौ ? वाञ्छास्ति चेत् सरोवरे ॥
स्नानेन गोपिकाभावं प्राप्य तत्र गमिष्यथ ॥२२॥

नारदउवाच

गोपिकावचनात्स्नानं कृत्वा मानसरोवरे ॥
गोपिकाभावमाश्रित्य गतौ तौ रासमण्डले ॥२३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जीवैः समेतं परवासुदेवं
रासेश्वरं राधिकया रमन्तम् ॥
दृष्ट्वा जनैः सेवितमच्युतं तौ
राजन्नभूतामधिकंप्रसन्नौ ॥२४॥

कृष्ण ? कृष्ण ? महायोगिन् गोविन्द गरुढध्वज ॥
जनार्दन ज़गन्नाथ पद्मनाभ नमोस्तु ते ॥२५॥
देवाधिदेव देवेश पुण्डरीकाक्ष माधव ॥
दामोदर हृषीकेश वासुदेव नमो ऽस्तु ते ॥२६॥
रसिक रसनाधीश रासेश्वर व्रजेश्वर ॥
त्वया हि रचितं विश्वं रासलीलामृतं वरम् ॥२७॥

नारदउवाच

द्विजेन सार्धं व्रजगोपिकातनुं
स्मितानन वस्त्रनिगूढदेहम् ॥
रमन्तमाद्यं पुरुषं सदा शिवं,
उवाच कृष्णो मधुरामृतं वचः ॥२८॥

श्री भगवानुवाच।

इलावृते केवलमेक पूरुषः
त्वमेव शम्भो ? रमसे महेश्वर ॥
तथाधुनैको व्रजसुन्दरीजनैः
रमे रमाभिर्नवरासलीलया ॥२९॥

दयालवः प्राणिषु दीनसेवकाः
तपःसहाः शीलयुता न वञ्चकाः ॥
सदैव लोकस्य हितेच्छवो नराः
वराय ते योग्यतमा भवन्ति मे ॥३०॥

शिव उवाच

यत्र वृन्दावने रम्ये रमसे रासमण्डले ॥
तत्रावयोश्च वासःस्यात् कुञ्जेऽस्मिन् यमुनातटे ॥३१॥
भगवन् राधया सार्धं विहितं परमाद्भुतम् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नेत्रैर्लीलामृतं पातुं शक्नुवो हि निरंतरम् ॥३२॥

श्रीकृष्णउवाच

यस्मिन् पुण्यतमे देशे साधुभिः सज्जनैर्युते ॥
तस्मिन् तीर्थेत्वयाकार्यो निवासो भगवन् शिव ! ॥३३॥
वृन्दावने भारतस्य यमुनायास्तटे शुभे ॥
नेपाल पूर्वभागे च त्रयोदशोपवर्तने ॥३४॥
गोपश्वरस्वरूपेण निवासं कुरु शंकर ॥
भक्तास्त्वां पूजयिष्यन्ति धरापि सुखिनी भवेत् ॥३५॥
अपवित्रा दुराचाराः पापिनो ये महेश्वर ॥
अर्चयिष्यन्ति त्वां तेषां पापान्यपि समाहर ॥३६॥

शिव उवाच

पापिनां सर्वपापानि व्याहरिष्ये तवाज्ञया ॥
तेभ्यो मोक्षं कथं लप्स्य उपायं कुरु केशव ? ॥३७॥

श्रीकृष्ण उवाच

सन्निधौ तव हे शम्भो ? मन्दिरे दिव्यविग्रहे ॥
अदृश्यशक्तिरूपेण नित्यं तिष्ठामि शंकर ? ॥३८॥
षोडशनाममन्त्रं मे न कीर्तयन्ति ये नराः ॥
त्वया हृतानि पापानि तैः सार्धं प्रेषयाम्यहम् ॥३९॥
शिवस्य सन्निधिं प्राप्य स्थित्वा शुद्धेन चेतसा ॥
कीर्तयिष्यन्ति ये तेषां पापानि नाशयाम्यहम् ॥४०॥
विधायैवं हि भक्तानां गोपेश्वरस्य दर्शनम् ॥
वृन्दावनेऽपि कृष्णस्य दर्शनं सफलं भवेत् ॥४१॥
भुवो भारावताराय स्थातव्यं तत्र शंकर ॥
सिध्यति निश्चितं कार्यं त्वं च मुक्तो भविष्यसि ॥४२॥
श्रुत्वातीव प्रसन्नोऽभूत् श्रीकृष्णस्यामृतं वचः ॥
गच्छामि तत्र भक्तार्थमिति निश्चितवान् शिवः ॥४३॥
नामसंकीर्तनं राजन् केशवस्य शिवस्य च ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रद्धया परया कार्यं स्वश्रेयसेऽमृताय च ॥४४॥

इति श्री गोपेश्वरमाहात्म्ये नारद वहुलाश्वसंवादे शिवस्यत्रयोदशोपवर्तनस्थानगमननिर्णयो नाम द्वितीयोऽध्यायः ॥२॥

द्वितीय अध्यायको सारांश

शौनकजी सूत पौराणिकसँग सोध्नु हुन्छ । गोपेश्वर देवता कहाँ हुनुहुन्छ मन्दिर कहाँ छ । पूजा बिधि के हो मानिसले पूजा ब्रत दर्शन् गर्नाले कस्तो फल पाउँछन् । उत्तर दिदैं सूतमुनि भन्नुहुन्छ । एकदिन भारतबर्षको गङ्गा किनार हरिद्वारमा देवसभा भयो । दुराचारको भारले पीडित् पृथिवीलाई देखेर ब्रह्माले विष्णुलाई भन्नुभयो । कंशादि पापरत नरकगामी जीवको उद्धारका लागि लीला मानुष विग्रह श्रीकृष्ण रूप लिएर खेल्दै भूभार हरण गर्नुहोस् । विष्णुले भन्नु भयो हेब्रह्मादिदेवताहरु हो ! तपाई सवै एकरूप लिएर मेरो सहयोग गर्नुहोस् भनी सबैलाई अवतार लिन प्रेरणा गर्नु भयो । त्यस पछि सबै ब्यवस्था मिलाएर विष्णु भगवान्ले कृष्णको रूपमा अवतार लिनुभयो र विभिन्न राशलीलाहरू रचना गर्नु भयो । मिथिलेश वहुलाश्व र नारदको संवाद ल्याएर गोपेश्वर नाम सम्बन्धमा कथा सुनांउनुहुन्छ । नारद भन्दछन् - एक दिन तीर्थहरू भ्रमण गर्दै वृन्दावन पुगेको थिएँ । हेराजन ! वृन्दावनमा विवेक चक्षुद्वारा कृष्णको विचित्र चरित्र देखें । कृष्ण रासलीला गर्दै हुनुहुन्थ्यो । त्यो रासलीला हेर्न शिव पार्वती आसुरि मुनि आउनु भयो । रासलीला हुन लागेको दिव्य स्थलमा प्रवेश गर्ने बाटामा द्वाररक्षक गोपिका बसेकी थिइन् । तिनले शिव र आसुरि लाई रोक्तै भनिन् । यस भित्र कोही पनि पुरूष प्रवेश गर्न पाउँदैनन् । भगवान् श्रीकृष्णको यही आज्ञा छ । यदि प्रवेश गर्ने इच्छा छ भने त्यस सरोवरमा स्नान गर्नुहोस् शुद्धवस्त्रं प्राप्त हुन्छन्, धारण गरेर प्रवेश गर्न सक्नुहुन्छ । यस्ता गोपीका वचन सुनेर शिव र आसुरि मुनि सरोवरमा स्नान गर्न प्रवेश गरे । त्यस पछि गोपी बनेर रासमण्डलमा प्रवेश गरे । राधिका स्वरूप लिएकी मूल प्रकृतिसँग रमण गर्ने परवासुदेव भगवान् श्रीकृष्णलाई देखेर अत्यन्त खुशी हुनुभयो । वन्दना गर्नु भयों । भगवान्ले ऋषिसँग पाल्नु

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भएको सदाशिवलाई चिन्नुभयो र भन्नु भयो । हेशिव ! इलावृत्तमा केवल एक पुरूष तपाई देवी शक्तिहरूसँग रमणा गर्नुहुन्छ भने वृन्दावनमा गोपीहरूसंग एकमात्र पुरूष म रमण गर्दछु । तपाइंको वन्दना सुनेर खुशी भएं वर मारनुहोस् । शिवले भन्नुभयो हे कृष्ण यस यमुनाको किनारमा यस कुन्जमा हाम्रो पनि वास होस् र तपाईंको रासलीला हामी सधैं नेत्रद्वारा पान् गर्न सकौं । भगवान्बाट आज्ञा भयो । हे शिव जहाँ जहाँ सज्जनहरूको निवास छ । त्यहाँ त्यहाँ तपाईंको वास होस् । गोपेश्वर रूपले वृद्धावन यामुनाको किनारमा र नेपालको पूर्वभागमा स्थित तेह्रथुमको पिप्ले भन्ने ठाउँमा वास गर्नुहोस् । धेरै भक्तहरू हुनेछन् । पूजा पनि गर्नेछन् । पृथिवी पनि सुखिनी हुनेछिन् । सज्जन र पापीहरू दुवैले पूजा गर्नेछन् । पापीहरूका सबै पापहरू नाश गरिदिनु होला । शिवले भन्नु भयो । प्रभो त्यो पाप्वाट छुट्कारा कसरी पाउन सक्छु त्यो पनि आज्ञा होस् । कृष्ण भगवान्ले भन्नुभयो । तपाईं बसेको ठाउँमा अदृश्यरूपले म वसेको हुन्छु । अत - शिव मन्दिरमा शालिग्राम राखेको हुन्छ । शालिग्रामको स्पर्शले शिवमा चढाएको फल जल शुद्ध हुन्छ । शालिग्राम राखेको छैन भने शुद्ध हुदैन खानु पनि हुदैन । (यस्तो ख्याति प्रसिद्धि छ) षोडशनाम मन्त्र जसले कीर्तन गर्दैनन् त्यसैका साथ पापीहरूले गरेको पाप् पठाइदिन्छु । तपाँइ सँगको पाप नाश गरिदिन्छु । कृष्णका वचन सुनेर शिव प्रसन्न हुनुभयो । तेह्रथुम पिप्ले जाने निर्णय पनि गर्नु भयो । नारद वहुलाश्व र सूतजी शौनकहरूलाई सुनाउदै हुनुहुन्छ । त्यसकारण शिवमन्दिरमा षोडश नाममन्त्र -

हरे राम हरे राम राम राम हरे हरे
हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे ।

नित्य कीर्तन गर्नाले गोपेश्वर प्रसन्न हुनुहुन्छ । यसरी द्वापर युगमानै कृष्ण-शिव सम्बाद हुँदादेखिनै पिप्लेमा माहादेव रहनुहुने चर्चा भएको छ ।

इति गोपेश्वर माहात्म्य अन्तर्गत शिव तेह्रथुम गमन निर्णयनाम द्वितीय अध्याय ॥२॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अथ तृतीयोऽध्यायः ।

शिव उवाच

पूर्वोक्तं मण्डलं कुत्र त्रयोदशोपवर्तनम् ॥
स्थानानि जनवासाश्च पर्वताः सन्ति कीदृशाः ॥१॥
देवालया नदा नद्यः एतेषां वर्णनं कुरु ॥
कैर्मार्गैस्तत्र गन्तव्यं सर्वं कथय केशव ? ॥२॥

श्रीकृष्ण उवाच

हे शिव यत्र ते वासस्तत्र पुण्यस्थलं भवेत् ॥
वर्तसे ह्येकरूपेण भक्तोद्धरणतत्परः ॥३॥
केदारेश्वर ओंकारो हिमाद्रौ नर्मदातटे ॥
काश्यां च विश्वनाथोऽब्धौ रामेश्वरो हि दक्षिणे ॥४॥
उज्जयिन्यां महाकाल एवं रूपेण वर्तसे ॥
रक्षसि भारतं वर्षं भक्तोद्धरणतत्पर : ॥५॥
नेपाले हिमवत्खण्डे रमणं कुर्वता त्वया ॥
बहूनि सन्ति तीर्थानि भवता रचितानि च ॥६॥
चन्द्रोद्भाषितशेखंरो भयहरो गङ्गाधरः शंकर : ॥
वाग्मत्यां तटसंस्थितः पशुपतिः कैलाशवासी भवान् ॥७॥
भक्तान्नुन्नमयन् शिवो निवसति त्रैलोक्यसंचालकः ॥
नेपालस्य स्थितौ प्रबोधनपरो लोकैः सदा स्तूयते ॥८॥
भारतस्योत्तरे भागे चीनदेशात्तु दक्षिणे ॥
नेपालराष्ट्रनामा वै देशोऽस्ति भूमिपावनः ॥९॥
दक्षिणे समभूभागा उत्तरेतु हिमालयाः ॥
सस्याढ्या मध्यभागाश्च सन्ति तत्र शिवालया : ॥१०॥
भविष्यति मुनिश्रेष्ठो नेनामको महामुनि : ॥
तेनैव पालनाद्देशो नेपालः कथयिष्यते ॥११॥
राज्यानि[1] क्षुल्लका ग्रामा भविष्यन्ति कलौ युगे ॥
राजानो राज्यलोभेन योत्स्यन्ते च परस्परम् ॥१२॥
सूर्यांशसम्भवो राजा कालान्तरे भविष्यति ॥
पृथ्वीनारायणो वीरो देशमेकं करिष्यति ॥१३॥

१. साना

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कर्णालीगण्डकीकोश्यो महानद्यो हि पुण्यदाः ॥
कालीमेच्यौ हि सीमे द्वे सरितः सन्ति निर्मलाः ॥१४॥
नद्यः पुनन्ति ताः सर्वा नेपालजननीं सदा ॥
सुदूरपश्चिमे स्थाने नेपालगञ्जपत्तने ॥१५॥
वागीश्वरीं नमस्कृत्य याहि पूर्वोत्तरं ततः ॥
मुक्तिक्षेत्रं कुरुक्षेत्रं वराहक्षेत्रमेवच ॥१६॥
हरिहरं च यत्क्षेत्रमन्यत्पाशुपतं मतम् ॥
वहुष्वेतेषु नेपाले. त्रीणि क्षेत्राणि सन्ति हि ॥१७॥
पश्चिमे मुक्तिनाथाख्यं पूर्वे वाराहमेव च ॥
पाशुपतं महाक्षेत्रं मध्येऽस्ति काष्ठमण्डपे ॥१८॥
पुण्यतमानि सर्वाणि समानानि च सर्वदा ॥
तेषां दर्शनमात्रेण महत्पुण्यं हि लभ्यते ॥१९॥
समग्रदेशनेपालरक्षकस्त्वं सदाशिव : ॥
राष्ट्रिय देवतारूपः पशुपतिर्विराजसे ॥२०॥
एषु वासकृता नाथः लब्धानन्देन हि त्वया ॥
मार्गेणानेन गन्तव्यं त्रयोदशोपवर्तनम् ॥२१॥
देवदेवीनदीनां च शैलानां वच्मि शंकर ॥
पुण्यतमानि नामानि जनाघापहराणि च ॥२२॥
नामोच्चारणमात्रेण नराः पुण्यमवाप्नुयुः ॥
अम्वा गुह्येश्वरी सिद्धा काली च मनकामना ॥२३॥
प्रस्थभरा सुभद्रा च शारदा विन्ध्यवासिनी ॥
हेलम्बुवासिनी देवी हलेसी शिवरूपिका ॥२४॥
इलादेवी भद्रकाली चेलोपाख्यानसम्मता ॥
चन्दननाथदेवोऽस्ति जुम्लाजनपदेस्थितः ॥२५॥
वाग्लुंगे चाम्विकादेवी चारुशक्तिविभूषिता ॥
तथैव शक्तिदा देवी नुवाकोटे ऽस्ति भैरवी ॥२६॥
रूपा रारा च फेवा च वेगनाशादिकादयः ॥
तडागा पथि शोभन्ते शास्त्रोक्तफलदा : शुभाः ॥२७॥
पनौती देवघट्टा[क] च. केला[ख] दिंग्लादयस्तथा ॥

क) देवघाट ख) केलादि घाट

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रीडिरुर्वादितीर्थानि भूरीणि सन्ति भूतले ॥२८॥
गोश्वामिकुण्डमाहात्म्यमधिकं फलदायकम् ॥
श्रीविष्णुपादुकाःसन्ति गयावत् मोक्षदायकाः ॥२९॥
सतासी जानकीमाता कनकाप्यादि चण्डिका ॥
पलाञ्चोकी छिन्नमस्ता काली दक्षिणकालिका ॥३०॥
पञ्चोपवर्तने स्थान इमा[२] पञ्चोपवर्तिनी ॥
सिद्धकाली दन्तकाली सिंहदेवी च कालिका ॥३१॥
इत्यादिशक्तिभिः सन्ति रक्षिता हिमदेशजा : ॥
या भूमिः श्यामला मध्ये वर्तिनी लम्वुकोययो : ॥३२॥
फेदाप इति सर्वत्र लोके सा ख्यातिमागता ॥
पूर्वं यत् वर्णितं स्थानं त्रयोदशोपवर्तनम् ॥३३॥
अनेनैव सुमार्गेण गमनेन हि लभ्यते ॥
देवखातविलं[३] चास्ति यत्तत्र त्वं गमिष्यसि ॥३४।
तत्स्थानं साधुभिर्भक्तैर्गुहामन्दिरमुच्यते ॥
वह्व्यः पुण्यतमा नद्यो वहवः पर्वताः शुभाः ॥३५॥
विष्वक्संवसथाः[४] सन्ति जनतापामयापहाः ॥
पूर्वस्यां दिशि नेपाले खोटाङ्गमण्डले स्थितः ॥३६॥
हलेसीग्रामक्षेत्रेऽस्मिन् हलेश्वरो विराजते ॥
दुर्गमे हिमवत्क्षेत्रे नद्यस्ति दूग्धकौशिकी ॥३७॥
तस्या उत्तरभागेऽस्मिन् प्रकटोऽभून्महेश्वरः॥
पुरा भस्मासुरो दैत्यो दीर्घकालं हिमालये ॥३८॥
तपश्चकार तेनैव प्रसन्नोऽभूत्सदाशिवः ॥
याचते स वरं दुष्टो गौरीहरणलालसः ॥३९॥
यस्य शिरसि हस्तेन स्पर्शनान्म्रियतामिति ॥
तं हत्वा चिरकालाय निवासो भवताकृतः ॥
तत्राभिरमणं कुर्वन् याहि पूर्वाञ्चलं शनैः ॥ ४०॥

विमलजलझराणां कुल्यवारिप्रवाहो
विविधकुसुमवृक्षश्चोर्वरारम्यवप्रः ।
अधिकसमधरायां पिप्पलेग्रामवासो
विवुधबुधनिवासो वर्तते तत्र याहि ॥ ४१॥

---

२. देवी ३.ओडार ४.जनवास गाउँ ५. देवता

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इति श्री गोपेश्वरमाहात्म्ये शिवकृष्णसंवादे त्रयोदशोपवर्तनगमनमार्गे स्थित तीर्थस्थानवर्णनं नाम तृतीयोध्यायः ॥३॥

तृतीय अध्यायको सारांश

भगवान शिवले विष्णुसँग सोध्नु भयो । त्यो तेह्रथुम कहाँ छ । त्यहाँको जनवास भूमि पर्वत् नदीहरू कस्ता कस्ता छन् कहाँबाट जानुपर्छ । कृष्णबाट आज्ञाभयो हे शिव ? तपाई जहाँ जहाँ वस्नु हुँन्छ त्यहाँ त्यहाँ पुण्य तीर्थ हुनेछ । तपाईद्वारा गरेका तीर्थहरू हिमालमा केदारेश्वर , नर्मदा किनारमा ॐकारेश्वर , काशीमा विश्वनाथ समुद्रमा रामेश्वर उज्जयिनीमा महाकालेश्वर नेपालमा पशुपति नाथ छन् । भारतको उत्तर भागमा चीनदेखि दक्षिणमा नेनामका मुनिले पालन गरेको हुनाले नेपाल नाम भएको देश छ । त्यहा सूर्यवंशी (शाह) राजाले राज्य गर्नेछन् । ठूलो सिङ्गो एउटा राज्य वनाउनेछन् । त्यसमा कर्णाली गण्डकी कोशी ठूला नदी हुनेछन् । पूर्व र पश्चिम् सीमानामा मेची काली नदीहुनेछन् । अन्य नदीनालाहरू देवीदेवताका मन्दिरहरू प्रशस्तै हुनेछन् । पश्चिमदेखि क्रम नमिले पनि प्रसिद्ध देवी देवता र स्थलबोध गराउदै वर्णन गरिएको छ । नेपालमा तीन महाक्षेत्र छन् : मुक्तिक्षेत्र ,पशुपतिक्षेत्र र बराहक्षेत्र पर्दछन् । राष्ट्रिय देवता पशुपतिनाथ हुनुहुन्छ । गुह्येश्वरी सिद्धकाली मनकामना हलेसी चन्दननाथ पाथीभरा आदि धेरै देवी देवताहरू छन् । रूपा फेवा रारा वेगनाशादि तालहरू विभिन्न पर्वतहरू र नदीहरू साथै पोखरीहरू छन् । यी स्थानहरू पार गर्दै लम्वु र कोया खोलाको बीचमा फेदापको पिप्ले गाउँमा ठूलो ओडार छ । त्यहाँ पुग्नु भन्दा पहिले हलेसी भन्ने ठाउँ छ । तपाईले पहिले पार्वती हरण गर्ने उद्देश्यले तपस्या गर्ने भष्मासुरलाई मार्नु भएको थियो । त्यस ठाउँमा वास वसेर पूर्व जानु फेदाप पिप्ले पुगिन्छ । त्यो सज्जनको निवास स्थान हो । त्यहाँको जनसमूह भेटघाट हुने र बजार लाग्ने ठाउँ म्याङलुङ हो । इति गोपेश्वर माहात्म्य अन्तर्गगत मार्गस्थ तिर्थदेवता वर्णन नामक तृतीय अध्याय ॥३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अथ चतुर्थोऽध्यायः

शौनक उवाच

शिवकेशवयोर्दिव्यं संवादं हर्षवर्धकम् ॥
श्रुत्वोत्कण्ठा समुत्पन्ना श्रवणाय पुनः पुनः ॥१॥
ग्रामस्य पिप्पले नाम ख्यातिमायास्यति कथम् ॥
नदीग्रामान् तथा शैलान् हे सूत ? वर्णय क्रमात् ॥२॥

सूत उवाच

रासेश्वरं नमस्कृत्य दिव्यं तद्वचनं स्मरन् ॥
देव्या सह शिवो ऽगच्छत् कैलासे कृतनिश्चयः ॥३॥
यमुनायास्तटे कुञ्जे वंशीवटस्य सन्निधौ ॥
आसुरिमुनिना सार्धं ह्येकरूपः शिवोऽवसत् ॥४॥
नाम्ना गोपेश्वरो देवः प्रसिद्धः स शिवो ऽभवत् ॥
परित्राणाय साधूनां धर्मसंवर्धनाय च ॥
समाधौ स्थितवान् शम्भुर्धर्मरक्षणतत्परः ॥५॥
समाधौ निश्चलं दृष्ट्वा देवी शिवमुवाच यत् ॥
हे प्राणनाथ ? हे शम्भो ? किं चिकीर्षसि मां वद ॥६॥
सस्मितो नेत्र उद्घाट्य देवीं वाक्यमुवाच ह ॥
हे देवि ? पृथिवीभारनाशाय क्ष्मां ब्रजाम्यहम् ॥७॥
ततः सोँऽन्तर्हितः सद्यः पार्वती खिन्नमानसा ॥
येन रूपेण वर्तेत तं कर्तुं दृढनिश्चया ॥८॥
रमन्तं मृगिणीमध्ये दृष्ट्वा मृगवरं वरम् ॥
शिवमन्वेषमाणा सा बभूव मृगिणी वरा ॥९॥
पशुपतिस्वरूपं स त्यक्त्वा शिवो न्यलीयत ॥
सापि गुह्येश्वरीरूपं स्थापयित्वा न्यलीयत ॥१०॥
किरातरूपमाधाय पूर्वपर्वतमण्डले ॥
भ्रमन् क्रीडन्नदृश्योऽभूदुमान्वेष्टुं विनिर्गता ॥११॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एकदा पाण्डवाः जग्मुर्वेदव्यासस्य सन्निधिम् ॥
प्रेषिता वनवासाय दुष्टदुर्योधनादिभिः ॥१२॥
भगवन् सर्वमर्मज्ञ जानास्यस्माकमागतम् ॥
दुःखोदधिं वयं सर्वे कथं तरेम तद्वद ॥१३॥
प्रसन्नो भगवान् व्यास उपायं चिन्तयन् मुदा ॥
दयार्द्रः पाण्डवान् प्राह सेवध्वं श्रद्धया शिवम् ॥१४॥

सूत उवाच

विद्यां प्रतिस्मृतिं[1] व्यासो युधिष्ठिराय दत्तवान् ॥
एकान्ते विधिना तस्मा अर्जुनं निर्दिदेश च ॥१५॥
तपार्थमर्जुनो ऽगच्छत् लव्ध्वा विद्यां युधिष्ठिरात् ॥
शस्त्रास्त्रसज्जितो दिव्यमिन्द्रकीलं शिलोचयम् ॥
धनञ्जयोऽश्रृणोत् तत्र "स्थिरो भव स्थिरो भव" ॥१६॥
ददर्श परितः पश्यन् वृक्षस्याधः स्थितं मुनिम् ॥१७॥
एकं कृशतनुं शान्तं सन्दीप्तं ब्रह्मतेजसा ॥
वद्धाञ्जलिर्विनम्रः सन् वन्दनां सञ्चकार सः ॥१८॥
तपस्वी तं पुनः प्राह श्रृणु हितकरं वचः ॥
कोऽसि मनसि का वाञ्छा स्थानमेतत्तपोब्रतम् ॥
इतोऽग्रे त्वं न याहीति धृतेष्विषुधिकार्मुकः ॥१९॥

अर्जुन उवाच

युधिष्ठिरस्य भ्राताहमर्जुन उपमध्यमः ॥
शिवस्याराधनां कर्तुं वाञ्छामि भ्रातुराज्ञया ॥२०॥
धनुर्धरस्तपस्तप्त्वा तर्पयामि शिवं प्रभुम् ॥
एतदर्थं हि गच्छामि सुस्थानं मुनिसेवितम् ॥२१॥
हे मुने ? तपसा शीघ्रं कथं शंकरः सेव्यते ॥
कुत्र स कीदृश आस्ते कथय मां कृपानिधे ? ॥२२॥

---

1. *विर्सिएको ठीक ठाउँमा प्रयोग संझाउने*

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मुनिरुवाच

इन्द्रं मां प्रतिजानीहि ह्युपदेष्टुमिहागतः ॥
विश्वासः खलु कर्तव्यो वचने धैर्यमावह ॥२३॥
पर्वतश्रृङ्खलामध्ये नेपालपूर्वमण्डले ॥
स शिवः संभ्रमन्नास्ते नदीस्थानानि वै श्रृणु ॥२४॥
विशाला चारुणा यत्र वहति सुजला नदी ॥
तमोर्याख्यापि तत्रैव वहति पावनी नदी ॥२५॥
तयोर्मध्ये नदा नद्यो विरजाः सन्त्यनेकसः ॥
श्रृणु नामानि तासां त्वं यत्र कीडति शंकरः ॥२६॥
माङ्मा किंवा सभा सांवा लम्वा पिङ्वा च पिल्लवाः ॥
कावेरी खुरगङ्गा च मेवा माया पवित्रकाः ॥२७॥
सिद्धखातं[२] रात्रिखातं वनं वृक्षौर्विभूषितम् ॥
त्रिककुद्मान्[३] गिरिर्यत्र तत्र कीडति शंकरः ॥२८॥
एताः पुण्यतमा नद्यो यत्र वहन्ति निर्मलाः ॥
किरातरूपमाधाय तासु स्नाति हि शंकरः ॥२९॥
ककुच्छृङ्गो[४] महान् शैलो रम्यः संवसथस्तथा ॥
अधित्यकास्थलं यत्र तत्र कीडति शंकरः ॥३०॥
वहून् हि पिप्पलान् वृक्षानारोपयन् नरा मुदा ॥
पितृणां मुक्तये यस्मिन् तेनाऽभून्नाम पिप्पले ॥३१॥
स्वकीयभूषणान् नागान् नागह्रदे निवासयन् ॥
भृगुतलोद्भवं गङ्गाजलं पिवति शंकरः ॥३२॥
उपत्यकाषु या आपः फेदाप इति कीर्तितः ॥
तं. परितः स्थिता ग्रामाः पिप्पले म्याङ्लुङादयः ॥३३॥
शैलारामा ऽ म्फुवासाव्लाः सन्त्येषु रमते हरः ॥
अन्ये सोल्मा च पौरन्दीकृष्णमृद्गजपल्ल्वलाः ॥३४॥

---

२. पोखरी ३. तीनजुरेथुम्को ४. जिरीखिम्ती

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सानन्दो मृगयां कुर्वन् तेषु भ्रमति शंकरः ॥
सकान्त्याख्यं खेलपुरं कदा जलजलं तथा ॥३५॥
क्रीडां कुर्वन भ्रमन्नास्ते स्वरूपं परिवर्तयन् ॥
भारतोस्योत्तरे भागे हिमालयस्य दक्षिणे ॥३६॥
मेचीकाल्यो र्मध्यभागे या भूमिः सा शिवप्रिया ॥
शिववासो यत्र यत्र तत्रत्या मानवा अपि ॥३७॥
विद्वांसः सज्जनाः पार्थ भवन्त्यास्तिक्यवुद्धयः ॥
यत्र यत्र शिवः स्नाति भ्रमति क्रीडति स्वयम् ॥३८॥
नद्यो गङ्गासमाः स्थानं तीर्थपुण्यतमं सदा ॥
कैलाशसन्निधावेके पर्वते कण्टकान्विते ॥३९॥
देहसुखमनादृत्य भज शिवं निरन्तरम् ॥
प्रसन्नः स शिवो भूत्वा तुभ्यमस्त्रं प्रदास्यति ॥४०॥
तदाहमपि सर्वाणि दिव्यास्त्राणि ददामि ते ॥

सूत उवाच

मुनिरूपं देवराजं परिक्रम्य प्रणम्य च ॥४१॥
आशीर्वादं समाधाय तत्स्थानं सञ्जगाम ह ॥
शस्त्राणि धारयन् धीरः वीरासनेन संस्थितः ॥४२॥
अर्जुनः शिवमात्मस्थं यथाश्रुतमचिन्तयत् ॥४३॥

अहिपतिकृतभूषं पार्वतीशोभिताङ्गं
गगनसदृशरूपं भस्मना लिप्तदेहम् ॥
हरिसुरमुनिवन्द्यं वेदसारं स पार्थः
कुलवृजिनविहत्यै शंकरं ध्यायति स्म ॥४४॥

इति श्री गोपेश्वरमाहात्म्ये अर्जुनकृततपोवर्णनं नाम चतुर्थोध्यायः ॥४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चतुर्थ अध्यायको सारांश

शिव र कृष्णको सम्वाद सुनेर खुशी भएका शौनकले पिप्पले गाउँको प्रसिद्धि कारण र नदी पर्वत र गाऊको वर्णन सुनाउन आग्रह गर्नु भयो । सूतजी सुनाउनु हुन्छ । त्यस पछि शिव एकरूपले यमुना किनारमा बस्नु भयो । निर्देश गरिएको ठाउमा जाने इच्छाले वास्तविक शिव पार्वती कैलाशमा जानु भयो । त्यहाँ गोपेश्वर नामले प्रसिद्ध हुनुभयो । शिव साधु सन्त र धर्मको रक्षा कसरी हुन सक्छ ! भनी ध्यान गर्न लाग्नु भयो । समाधिमा बसेका शिवलाई पार्वतीले के को लागि ध्यान गरेको भनी सोध्नु भयो । म पृथिवीको भार नाश गर्न जान्छु भन्नु भयो र अदृश्य हुनुभयो पार्वती पनि शिवलाई खोज्दै जानु भयो । शिव मृग बन्नु भएको रहेछ पार्वती पनि मृग नै बन्नु भयो । पशुपति रूप छोडेर शिव पुन. अन्तर्ध्यान हुनुभयो । पार्वती पनि गुह्येश्वरी रूप छोडेर अन्तर्ध्यान हुनुभयो । शिव लिम्बूको रूप धारण गरेर पूर्व पर्वत तर्फ लाग्नु भयो । पार्वती खोजी गर्दै रहनु भयो ।

दुर्योधनद्वारा जुवामा हराएर वनवास खेदिएका पाण्डवहरुले व्यास मुनिका नजिकमा गएर दु.खबाट कसरी पार हुन सकिन्छ भनी सोधे । वेदव्यासले समाधिद्वारा ठहराई प्रतिस्मृति नाम गरेको विद्या युधिष्ठिरलाई दिनुभयो र शिवको आराधना गर्ने उपाय बताउनु भयो । युधिष्ठिरले त्यो मन्त्र अर्जुनलाई सिकाएर इन्द्रकील पर्वतमा तपस्या गर्न पठाउनु भयो । शस्त्र अस्त्रले सुसज्जित भएर अर्जुन जादै हुनुहुन्थ्यो । पख पख हतियारधारी पुरूष यस भन्दा अगाडि जान पाउदैन । किनभने यो तपोभूमि हो । अर्जुनले शिष्टाचार पूर्वक नमस्कार गरेर म शिवको तपस्या गर्न जान्छु । कसरी तपस्या गर्ने , शिव कस्ताछन् कहाँ रहन्छन् बताउन अर्जुनले आग्रह गरे । मुनिले भने हे अर्जुन ! म इन्द्र हुँ । म तिमीलाई उपदेश दिन यहाँ आएको हूँ । अरुणा र तमोरी नदीका बीचमा धेरै नदीहरू डांडाहरूछन् । ती मध्ये लम्वु र खोरुङगा नदीको बीचमा पहाड पर्वतमा नदीहरूमा पोखरीहरूमा विभिन्नगाउँहरूमा शिव घुम्नु हुन्छ रमाउनु हुन्छ । खोजेर भेटिनु हुन्न । बरू कैलाशको नजीकमा (इन्द्रकील) पर्वतमा कष्ट सहेर तप भजन गर्नु भयो भने खुशी भएर दर्शन र अस्त्र दिनुहुनेछ । त्यस पछि हामी पनि अस्त्र दिउला भन्नु भयो । अर्जुनले मुनिको कृपा संझी परिक्रमा दण्डवत् गर्नुभयो र शिव स्वरूप ध्यान गरेर तपस्या गर्न लाग्नु भयो । श्री गोपेश्वर माहात्म्य अन्तर्गत अर्जुनकृत तपस्यावर्णन नामक चतुर्थ अध्याय ॥४।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अथ पञ्चमोध्यायः

सूत उवाच

कैलासवासिनी देवी शिवाराधनकर्मणि ॥
ददर्श संस्थितं पार्थं शिवदर्शनकाङ्क्षणम् ॥१॥
तं विहन्तुं समुद्यन्तं मूकाख्यं[1] दुष्टदानवम् ॥
दृष्ट्वा सा शिवमन्वेष्टुं जगाम म्याङलुङं वनम् ॥२॥
देवखातविले दिव्ये गुहावेश्मनि संस्थितम् ॥
स्मारयामास सा देवी भक्तपालाय तं शिवम् ॥३॥
गोपभावमयं रूपं तत्र संस्थाप्य शंकरः ॥
किरातरूपमाधाय जगामार्जुनसन्निधिम् ॥४॥
देव्यपि गोपरूपस्य सेवायै तत्पराऽभवत् ॥
शिलायां देवताशक्तिं निधाय सा तमन्वगात् ॥५॥
पान्तीन्द्रियाणि गोपा ये तेषामधिपतीश्वरः ॥
जीवाधीशो भवेत् सैव परमात्माऽखिलेश्वरः ॥६॥
यो गाः पातीति गोपः स्यात् तस्येश्वर उमेश्वरः ॥
गोप एवेश्वरो देवः सर्वत्र ख्यातिमागतः ॥७॥
लक्ष्यदृष्ट्या हि गोशव्दो विविधार्थान् प्रकाशते ॥
स्वर्गेषुपशुवाग्वज्रदिङ्नेत्रजलभूकरान् ॥८॥
म्याङ्लुङस्य च स्थानस्य प्रसङ्गं चित्तमोहकम् ॥
श्रावयिष्यामि तत्सर्वं श्रृणु ध्यानेन शौनक ? ॥९॥
कालान्तरे हि तत्स्थानं भविष्यति प्रमण्डलम् ॥
तत्स्थानं कथ्यते चाद्य त्रयोदशोपवर्तनम् ? ॥१०॥
वर्षाकाले व्यतीते तु शरदृतुसमागते ॥
वोढारो[2] भारमानीय गच्छन्ति स्म च कुत्रचित् ॥१०॥

---

१. मूक नामक दैत्य २. भारी बाक्ने

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पर्वतस्यानते स्थाने म्याङ्लुङे नाम्नि सुन्दरे ॥
विश्रामं कृतवन्तस्ते भोजनाय बुभुक्षवः ॥११॥
चुल्लं निर्माय तत्रैव देवीशिलां प्रयुज्य च ॥
अग्निं प्रोज्ज्वाल्य तेऽतिष्ठन् पक्तुं तत्रोदनं मुदा ॥१२॥
अभूदाश्चर्यमेकं यत् कम्पमानाः शिलास्तदा ॥
पाकभाण्डानि सर्वाणि कम्पितान्यपतन् भुवि ॥१३॥
तेष्वेकः कूपितः शीघ्रं शिलां खड्गेन प्राहरत् ॥
रुधिरमपतत् तस्मात् पाषाणात् च भयप्रदम् ॥१४॥
आक्रम्य सिंहरूपेण देव्येकं तेष्वमारयत् ॥
अन्ये सर्वे पलायन्तो भयशोकेन विह्वलाः ॥१५॥
दिनेऽस्मिन्नेकमार्जारोऽभ्रमद् रुदन् हि तत्स्थले ॥
स्वेच्छया भ्रमणं कुर्वन् किरातस्तत्र चागतः ॥१६॥
मार्जारः स्वेन खड्गेन किरातेन च ताडितः ॥
भ्रमति स्म च तत्स्थाने पीडयोच्चै रुदन्मुहुः ॥१७॥
अभ्रमद् आखुभुक् तत्र रक्तविन्दून् प्रपातयन् ॥
आगमन् घटनां द्रष्टुं नरा नार्यश्च चक्किताः ॥१८॥
अन्तर्लीनो भवत् सद्यो मार्जारोऽयं तु तत्क्षणात् ॥
एकः सिंहस्तदाऽगर्जत् भीषयन्नागतान् जनान् ॥१९॥
सो ऽकर्षदेकपाषाणं क्रुद्धोऽभून् म्याङ्लुङेस्थितः ॥
अद्यापि दृश्यते लक्ष्म तस्य नखेन चिह्नितम् ॥२०॥
इमं वृत्तान्तमश्रृणोत् भाग्यवान् स्वजनात्तदा ॥
क्षपायां दृष्टवान् स्वप्नं मार्जारो ऽभवदम्बिका ॥२१॥
मेञ् मार्जारं लुङं ग्रावम् तत्रत्याः शवरा नराः ॥
स्वभाषायां तदा प्रोचुः स्थाननामाऽभवत् तदा ॥२२॥
मेञ्लुङस्यापभ्रंशेन म्याङ्लुङं नाम भार्गव ? ॥
ग्रामः स पत्तनं जातं त्रयोदशोपवर्तनम् ॥२३॥
सिंहदेव्याः प्रियं स्थानं क्रीडार्थं सुमनोहरम् ॥
प्रसिद्धं मन्दिरं तस्यास्तस्मिन्नेव विराजते ॥२४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मार्जारस्याकृतिं त्यक्त्वा भ्रमन्ती सिंहवाहिनी ॥
स्वप्नेऽवदत् भाग्यवन्तं[३] रुदन्ती सा मुहुर्मुहुः ॥२५॥

देव्युवाच

अहं सर्वेश्वरी देवी चाहं ब्रह्मस्वरूपिणी ॥
प्रकृतिपुरुषं मत्तो महदादियुतं जगत् ॥२६॥
ऋतानन्दाऽ[४]नन्दरूपा विद्याऽ विद्यात्मिका पि च ॥
ब्रह्माऽब्रह्मात्मिका चेति मामेव हि विचारय ॥२७॥
ब्रह्मविष्णुमहेशादीन् सर्वान् देवान् दधाम्यहम् ॥
ते देवा मां स्तुवन्तीत्थं सर्वदा भक्तिपूर्वकम् ॥२८॥

देवा ऊचुः

नमो देव्यै महादेव्यै शिवायै सततं नमः ॥
नमः प्रकृत्यै भद्रायै नियता प्रणताः मताम् ॥२९॥
त्वं स्वाहा त्वं स्वधा माता नित्यानित्या त्वमेवहि ॥
त्वं सावित्री सुधा देवि ? त्वमेव जगदम्बिका ॥३०॥
सृष्टिरूपा त्वमेवासि स्थितिरूपा त्वमेवहि ॥
करोसि संहृतिं चापि जगदेतन्निरन्तरम् ॥३१॥
विष्णुमाया महामाया चेतना बुद्धिरूपिणी ॥
निद्रा लक्ष्मीः क्षुधा छाया शक्तिःतृष्णा त्वमेवहि ॥३२॥
क्षान्ति र्जाति र्दया लज्जा शान्तिः श्रद्धास्वरूपिणी ॥
वृत्तिर्धृतिः स्मृतिः कान्तिः माता तुष्टिः सुपुष्टिदा ॥३३॥
भ्रामयसि जगत्त्वं हि कालचक्रं पुनः पुनः ॥
चितिरूपेण हे मातः कृत्स्नं व्याप्य स्थिताजगत् ॥३४॥
विष्णोरनुपमां शक्तिं मधुकैटभघातिनीम् ॥
दुर्गतिनाशिनीं दुर्गां महिषासुरमर्दिनीम् ॥३५॥
अम्बिकां पार्वतीदेहात् निसृतां परमेश्वरीम् ॥
ऐं ह्रीं क्लीं वीजमन्त्रैश्च भूषितां विश्वमोहिनीम् ॥३६॥
नामोच्चारणमात्रेण सुखसौभाग्यवर्धिनीम् ॥
लोकानां दुःखदारिद्र्यनाशाय संभजामहे ॥३७॥

३. भगिमान सुब्बालाई ४. सत्य

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दुःखसागरमग्नानां कर्मणा ऽवीचिगाामिनाम् ॥
उद्धरणाय सद्बुद्धिं देहि मातर्नमोस्तुते ॥३८॥
यदा यदा धर्मविनाशहेतुना
धरा भवेत् भारवती निराश्रया ॥
तदा तदागत्य नरान् कुमार्गगान्
त्वमेव हि प्रेरय धर्मकर्मणि ॥३९॥
एवं सवासवा देवाः स्तुवन्ति भक्तिपूर्वकम् ॥
भाग्यवन किं न जानासि मां देवीं हितकारिणीम् ॥४०॥
अतो मम निवासाय व्यवस्थां कुरु भाग्यवन् ॥
भविष्यति न ते स्थानमाहोस्वित् यद्युपेक्षसे ॥४१॥
त्वं जानीहि सदानित्यां मां देवीं सिद्धिदायिनीम् ॥
यदि मेऽग्रे भवेद्वाधा सर्वनाशो भविष्यति ॥४२॥
यदि वाञ्छसि कल्याणम् राष्ट्रे शान्तिं सुमङ्गलम् ॥
धूपदीपप्रदानेन विधेहि मङ्गलोत्सवम् ॥४३॥
स्वप्ने देव्याः प्रलापं च श्रुत्वाऽश्चर्यं भयानकम् ॥
उत्थाय स ययौ तत्र विचिन्त्योत्सवमङ्गलम् ॥४४॥
भूपः कर्णीरथे[५] देवीं संस्थाप्य सिंहवाहिनीम् ॥
नरान् संवाहयन् तस्याः कृतवान् महदुत्सवम् ॥४५॥
वटवृक्षे समानीय देवीशिलां न्यवेशयत् ॥
श्रद्धाविनयसंयुक्तः देव्याः स्तुतिं चकार सः ॥४६॥

भाग्यवानुवाच

अज्ञानात् विस्मृते भ्रान्त्या येऽच्छिदन् त्वां महेश्वरि ? ॥
दण्डयिष्यामि तान् मूढान् क्षमस्व परमेश्वरि ? ॥४७॥
सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके ॥
शरण्ये त्र्यम्वके देवि सिंहदेवि नमोऽस्तुते ॥४८॥
सर्वस्वरूपे सर्वेशे ? सर्वशक्तिसमन्विते ॥
अनेकरूपमादाय भ्रममाणे ? नमोस्तु ते ॥४९॥

५, मान्छे बोक्ने रथमा

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

म्याङलुङराजिते? मध्ये पिङ्गुवाखुरगङ्गयोः ॥
भक्तानां वरदे मातः सिंहदेवि नमोस्तु ते ॥५०॥
खड्गप्रहारकान् क्रूरान् वाहकान् मारणे रते ॥
ओतुरूपे महामाये सिंहदेवि नमोस्तु ते ॥५१॥
गोपेन्द्रस्य प्रिये ? ज्येष्ठे ? महानन्दे महोत्सवे ॥
महामारीहरे देवि सिंहदेवि नमास्तु ते ॥५२॥
नमो वेदान्तशास्त्रेषु वर्णिते ब्रह्मरूपिणि ॥
भक्तकल्पद्रुमे देवि सिंहदेवि नमोस्तु ते ॥५३॥
दयां कुरु महेशानि पामरेषु जनेषु हि ॥
कोपं संहर देवेशि ? सिंहदेवि नमोस्तु ते ॥५४॥
त्वमसि कालिका वाला शताक्षी भैरवी रमा ॥
राधा सीता जालपा च त्वमेव विन्ध्यवासिनी ॥५५॥
वैशाखशुक्लपक्षस्य पूर्णिमायां भविष्यति ॥
तव पूजा महादेवि विशेषोत्सवपूर्वकम् ॥५६॥
नवरात्रौ शुभे मासे शुक्ले पक्षे च पर्वणि ॥
पत्रं पुष्पं फलं तोयमन्नं दास्यन्ति मे जनाः ॥५७॥
व्योमरूपा महादेवी भाग्यवन्तमुवाच ह ॥
उपस्थिता जनाः स्पष्टं तद्वाक्यं शुश्रुवुस्तदा ॥५८॥
ममापराधवेलायाममूर्च्छन् मम सन्निधौ ॥
तत्रैव मारितो ह्येकश्चान्येऽरुदन् भयान्विताः ॥५९॥
तेषां प्रलापमाकर्ण्य क्षमादानं कृतं मया
देशान्तरं गताः सर्वे ते मूढा भारवाहकाः ॥
अहं स्थास्यामि ह्यत्रैव पूजा भवतु मे सदा ॥६०॥
आश्विनचैत्रयोः शुक्ले नवरात्रौ सुपर्वणि ॥
चण्डीपाठविधानेन पूजा भवतु मे सदा ॥६१॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यः कश्चित् पठति स्तोत्रं मद्भक्त्या त्वत्कृतं सदा ॥
वर्धन्ते सततं तेषां विद्यायुर्धनसिद्धयः ॥६२॥
तव निवेदनं श्रुत्वा प्रसन्नास्मि हि भाग्यवन् ? ॥
भविष्ये च प्रसन्ना स्यां ये मां द्रक्ष्यन्ति भक्तितः ॥६३॥
राधिका पार्वती सीता दुर्गा दुर्गतिनाशिनी ॥
सर्वा भगवती देवी मङ्गला सिंहवाहिनी ॥६४॥
ताडितापि हि देवी त्वं क्षमादानपरायणे ॥
नमस्करोमि भो मातः ? पाहि मां शरणागतम् ॥६५॥
सर्वाः सन्ततयश्चात्र पूजयिष्यन्ति सर्वदा ॥
प्रसन्ना भव हे मातर् पाहि मां शरणागतम् ॥६६॥
तुभ्यमहमिमां भूमिं ददाम्यद्यैव चाम्बिके ? ॥
पूजार्थं तव कल्याणि? व्यवस्थापि भविष्यति ॥६७॥

सूत उवाच

तदारभ्यैव सा देवी सिंहदेवी प्रकीर्तिता ॥
अस्या दर्शनमात्रेण मुच्यन्ते संकटान्नराः ॥६८॥
यद् यद् वाञ्छन्ति ये भक्ताः तत्तद्देव्याः प्रसादतः ॥
आयुरारोग्यसंमृद्धिं लभन्ते नात्र संशयः ॥६९॥
सिंहदेवीं समभ्यर्च्य नवरात्र्यां विधानतः ॥
चण्डीपाठं प्रकुर्वन्ति लभन्ते सिद्धिमुत्तमाम् ॥७०॥

न मे ज्ञानं मातः ? क्वचिदपि न शास्त्रं च पठितम् ॥
न मे भक्तिःकाचित् न च मम मनः सुस्थिरमिति ॥
इदानीं कारुण्यं तव महदभून्मां प्रति शुभ-
मतोऽहं त्वां याचे जननि ? सततं पालय जनान् ॥७१॥

इति श्रीगोपेश्वरमाहात्म्ये सिंहदेव्युत्पत्ति महिमावर्णनं नाम पञ्चमोध्यायः ॥५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पञ्चम अध्यायको सारांश

पार्वतीले शिवाराधनामा तल्लीन अर्जुनलाई मूक नामक दैत्यले मार्ने योजना गरेको थाहा पाउनु भयो र तेह्रथुम म्याङलुङ जानु भयो । त्यहाँ ठूलो गुफामा बसेका शिवलाई भक्तको रक्षा गर्न संझाउनु भयो । शिवले गोपभावरूप त्यहाँ स्थापना गरेर किरातको रूप धारण गरी अर्जुनका नजिक जानुभयो । पार्वती गोपेश्वरको उपासना गर्न लाग्नु भयो । गोप एवं ईश्वर गोपेश्वर–कृष्ण । गाः पशून् पाति इति गोपः तस्य ईश्वरः – पशुपतिः शिवः । अथवा गाः इन्द्रियाणि पान्ति ये गोपा जीवा तेषाम् ईश्वर जीवाधिपति पर मात्मा यस्तो व्युत्पत्ति द्वारा गोपेश्वरको अर्थ ब्रह्माण्डनायक हुन्छ । पार्वती पनि त्यस्ता भगवान्को केही समय उपासना गरेर प्रसिद्ध स्थलका शिलामा आफ्नू शक्ति स्थापना गरी अन्तर्ध्यान हुनुभयो । कालान्तरमा भारीबोक्नेहरू भारी बिसाएर तिनै शिलाको चंका बनाई खाना बनाउन लागे । ती शिलाहरू हल्लिएर भाँडाहरू लडे । रिसाएका ती भारवाहकले खड्गद्वारा काट्ने काम गरे । देवी प्रकट भएर प्रहार गर्नेलाई मारिदिनु भयो । अरु भागे । यस अघि त्यसै ठाउँमा बिरालाको रूपमा देवी रुदै घुम्दै हुनुहुन्थ्यो । एक किरातले बिरालोलाईं खुकुरी प्रहार गर्यो । रगत चुहाउदै रोएको बिरालो हेर्न मानिसहरूको घुइचो लाग्यो । देख्ता देख्तै बिरालो हरायो र सिंह बन्यो । सबै भागाभाग् भए । पछि भाग्यवान्ले (भगिमान) यो घटनाको सपना पनि देखे । ती देवी रहिछन् । लिम्बू भाषामा "मेत्र्"को अर्थ बिरालो र लुङको अर्थ ढुङ्गा हुन्छ । बिरालो आकार भएको ढुङ्गा मेत्रलुङ भनिन्छ । यसको अपभ्रंश हुदा म्याङ्लुङ नामले त्यो ठाऊ प्रसिद्ध भयो । एकदिन भगीमान्ले सपनामा सिंहवाहिनी देवीको दर्शन् पाए । देवीले भन्नुभयो । म सर्वशक्ति सम्पन्न देवीहूँ । मेरो देवताहरू स्तुति गर्दछन् । यदि गाउँ र राज्यमा सुखशान्ति चाहन्छौ भने मेरो राम्ररी स्थापना गरी जप पाठ पूजा आदि सम्मानको व्यवस्था गर । सपनामा देवीको दर्शन पाएका भगीमानले देवीलाई रथमा राखेर चारैतिरबाट आवागमन गर्न सजिलो तेह्रथुमको म्याङलुङ डाँढामा बरको फेदमा स्थापना गरेर देवीको स्तुति वन्दना गरे । पूजा चण्डी पाठको व्यवस्था मिलाए । वैशाख पूर्णिमा चैत्र तथा आश्विनका नवरात्रमा र अन्य पर्वमा धूप दीप पत्र पुष्प अन्न जल अर्पण गर्ने व्यवस्था मिलाए । पाठपूजा गर्नेले सिद्धि पाए पनि । इति गोपेश्वर माहात्म्यमा अन्तर्गत सिंहदेवी उत्पति महिमा पञ्चम अध्याय ॥५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अथ षष्ठोऽध्यायः

सूत उवाच

सौकरं रूपमादाय मूकाख्यो दुष्टदानवः ॥
तमर्जुनं हन्तुकाम आययौ तत्र सन्निधिम् ॥१॥
समीपमागतं दृष्ट्वा सोऽर्जुनो वाणमाददे ॥
कार्मुकं कर्णमाकृष्य वाणं चिक्षेप तं प्रति ॥२॥
तदानीं शंकरश्चापि प्राक्षिपद् वाणमुत्तमम् ॥
समकाले तयोर्वाणौ विद्धौ स च हतो सुरः ॥३॥
विवादोऽभूत्तयोस्तत्र "मया हतो मया हतः"॥
पुनर्विवदमानौ तौ युयुधाते परस्परम् ॥४॥
दर्शयामासतुस्तौ द्वौ स्वकीयं युद्धकौशलम् ॥
मल्लयुद्धे शिवो जिष्णुं पातयामास भूतले ॥५॥
दृष्ट्वार्जुनःशिवं तत्र किरातरूपशंकरम् ॥
श्रद्धया स्तवनं चक्रे पौराणं वेदसंमतम् ॥६॥

अर्जुन उवाच

भयहरः सुखदो भववारणो
भुजगहारयुतो वृषभध्वजः ॥
तपसि मग्नतनुः करुणाकरो
वसतु मे हृदये भगवान् शिवः ॥७॥

कुटिलकामहतो धिषणाकरः
सकलदोषविनाशकरो हरः ॥
भुवनपा उमया सह शंकरो
वसतु मे हृदये भगवान् शिवः ॥८॥

नटवरो नटराज उमापतिः
स्मरहरो गिरिशो गिरिजापतिः ॥
शरणदः सुखदः कृपयान्वितो
वसतु मे हृदये भगवान् शिवः ॥९॥

प्रतिदिनं स्पृहया चरणाश्रिता

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नवति भक्तजनान् शरणागतान् ॥
मुरजवादनदिव्यकलान्वितो
वसतु मे हृदये भगवान् शिवः ॥१०॥
शिरसि निर्मलवारिधरः प्रभु
रभयदो ग्रहदोषनिवारकः ॥
हरिविरिञ्चिनुतः सुरपूजितो
वसतु मे हृदये भगवान् शिवः॥११॥
त्रिनयनः सुजटः शशिशेखरो
भसितलेपशरीरमनोहरः॥
अजिनवस्त्रधरो जगदीश्वरो
वसतु मे हृदये भगवान् शिवः ॥१२॥
पृथुलरोषयुतश्च मुदान्वितः
जगति शीघ्रममङ्गलनाशकः ॥
गरलकण्ठधरः सुरपालको
वसतु मे हृदये भगवान् शिवः॥१३॥
विहितमित्रमुकुन्द इलेश्वरः
प्रभवपुष्टिकरः प्रलयंकरः ॥
स्वजनतापहरः शवरेश्वरो
वसतु मे हृदये भगवान् शिवः॥१४॥
भक्तस्य कल्मषहराय हरिप्रियाय
वेदान्तकल्पनिगमेषु सुवर्णिताय ॥
गोपेश्वराय सुखशान्तिधनप्रदाय
तस्मै नमो भगवते परमेश्वराय ॥१५॥
अर्जुनेन कृतं स्तोत्रं शिवाष्टकमिदं शुभम् ॥
त्रिसन्ध्यं यः पठेत् तस्य मनसि राजते शिवः ॥१६॥

सूत उवाच

अर्जुनस्य स्तुतेर्भावं विचार्य भगवान् शिवः ॥
प्रसन्नोऽर्जुनमुत्थाप्य हस्तस्पर्शं चकार ह ॥१७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हे कृष्णसख ? हे पार्थ ? कामपूरोऽस्मि शंकरः ॥
यदिच्छसि वरं दास्ये तद्याचयेत्युवाच सः ॥१८॥

अर्जुन उवाच

रिपौ प्रक्षेपसमय अन्यान्यस्त्राण्यनेकशः ॥
भवत्पाशुपतादस्त्रात् निःसरन्ति पुनःपुनः ॥१९॥
अधर्मान्यायनाशाय दुष्टानां दमनाय च ॥
युद्धे विजयलाभाय तद्दिव्यास्त्रं हि कामये ? ॥२०॥

शिव उवाच

अर्जुन ? दिव्यमस्त्रं मे तुभ्यमद्य ददाम्यहम् ॥
गृहीत्वेदं सदा त्वं हि संयुगे विजयी भव ॥२१॥
नरेष्वधर्मपक्षेषु प्रयोक्तव्यं हि यत्नतः ॥
धर्माल्पशक्तियुक्तेषु प्रयोगो न कदाचन ॥२२॥
धौताङ्घ्रिपाणिराचम्य श्रृणु मन्त्रं विधानतः ॥
प्रयोगमुपसंहारं सम्यग् जानीहि साधय ॥२३॥

सूत उवाच

एवं पाशुपतं दिव्यमर्जुनाय ददौ शिवः॥
तत आकाशमार्गेण ययौ पार्वतीसन्निधिम् ॥२४॥
अन्य इन्द्रादयो देवाः योग्यं ज्ञात्वार्जुनं तदा ॥
श्रीकृष्णप्रीतये तस्मै स्वकीयास्त्राणि संददुः ॥२५॥
अन्वेषयन् शिवस्तत्र त्रयोदशोपवर्तने ॥
दृष्टवान् पार्वतीं भक्तैः शिलीभूतां सुपूजिताम् ॥२६॥
अत्र ममापि पूजा स्यात् इति निश्चित्य शंकरः ॥
आर्यहृदि कियद्दिष्टे सूक्ष्मरूपः प्रविष्टवान् ॥२७॥
कालेकाले भविष्यन्ति शंकरप्रेरिता जनाः ॥
साधवः सज्जनाः सन्तः सदाचारपरायणाः ॥२८॥
सलनामा वली ज्ञानी भविता गुणभूषितः॥
तस्यपुत्रो जगत्केसी विज्ञाने प्रवीणो भवेत् ॥२९॥
भारद्वाजकुले चैव प्रभुरामो भविष्यति ॥
भविता भीमनामाख्यः संलग्नो धर्मकर्मणि ॥३०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रीप्रसादस्तथा तस्य पत्नी धर्मपरायणा ॥
पूर्णप्रसाद माण्डव्यः प्रणामी धर्मसाधकः ॥३१॥
महानन्द प्रजापतिर्लुइटेलोप नामकौ॥
ग्रामान्तेच वसेत्तत्र निरौला खेमनामकः ॥३२॥
अग्नि मानध्वजोः रामकृष्ण चूडामण्यादयः ॥
अन्या उपाशकास्तत्र परितो निवसन्ति हि ॥३३॥
कौशिक कुलजो प्येकः सेनापतिपदान्वितः ॥
सौम्याः छव्यादयः सन्तो भविष्यन्ति कलौ युगे ॥३४॥
भविता तेषु पुण्याख्यः सज्जनो ग्रामवाक्पतिः ॥
उदारा रुक्मिणी देवी भानुभक्तस्य श्रीमती ॥३५॥
तयोः पौत्रः शंकरोऽन्ये पुण्यवधू च- द्वारिका ॥
पद्मप्रसाद पुत्रोऽस्ति जयप्रसाद नामक : ॥३६॥
भगवद्हृदया एतेकौशिक (ढुङ्गाना) कुलभूषणा ॥
धीमन्तो भवितारोऽन्ये मण्डले हितकारिणः ॥ ॥३७॥
पुण्यतमानि कार्याणि करिष्यन्ति पुनः पुनः ॥
स्वनामधन्यकर्तारः कुशलाः कुलभूषणाः ॥३८॥
दिव्यं गतिं च प्राप्स्यन्ति लोकोपकारिणो नराः॥
मौदगल्यगोत्रजा ह्येते श्रीभक्तश्च महीपतिः ॥३९॥
त्रिलोचनादयश्चान्ये भविष्यन्ति तदा पुनः ॥
गोविन्दशरणो नाम तपस्वी वैष्णवः सुधीः ॥
तीर्थस्नायी सदाचारी सन्तस्तत्रागमिष्यति ॥४०॥
प्रत्युत्पन्नमतिर्वाग्मी भविता कुशलः सुधीः ॥
भारद्वाजकुलोत्पन्नो दीननाथो महाजनः ॥४१॥
स्वभावसरला सौम्या कौशल्येव हि कौशिला ॥
सौभाग्यशीलसम्पन्ना तस्य पत्नी भविष्यति ॥४२॥
कपिल भीम बोधादि पुत्राःसप्तर्षयःसमाः
भविष्यन्ति तयोर्बंशे सदाचार परायणाः॥४३॥
वृद्धिदिव्येश्वरीपुत्रो घिमिरेत्युपनामकः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तुलसी सज्जनो धीमान् भविष्यति सुधारकः ॥४४॥
चन्द्र नारद–कृष्णा,श्च पद्मौ नरपतिस्तथा ॥
वेदनिध्यादयश्चैते भवितारो दयान्विताः ॥४५॥
दुर्गा-इन्द्रविलासौ द्वौ भवितारौ हि काश्यपौ ॥
भविष्यन्ति पुनस्तत्र कृष्ण–केशव–पण्डिताः ॥४६॥
भारद्वाज कुलोत्पन्नं जयप्रासाद नामकम्
गुरुञ्च के नजानान्ति ? येन वालाः सुपाठिताः ॥४७॥
वाशिष्ठा सुधियश्चान्ये विद्यापत्यादयस्तथाः ॥
वात्स्यश्च शीलसम्पन्नो गोविन्दो ब्रह्मकर्मकृत् ॥४८॥
सुधियः सज्जना ग्रामं पावयिष्यन्ति निश्चयः ॥
नारायणखनालो हि सोल्मायां पण्डितो वरः ॥४९॥
चूडामणि–पद्मनाभ–खिलनाथादयस्तथा ॥
रामशिवप्रसादौ द्वौ विद्वांसौ शास्त्रवाचने ॥५०॥
वद्री–कृष्ण–शिवादीनां जननी प्रियदर्शिनी ॥
लक्ष्मीरिव लक्ष्मीनाम्नी श्रेष्ठकुले भविष्यति ॥५१॥
भविता शंकरोमानी धनवान् पुण्यवान् जनः ॥
तस्य गुरुर्महाज्ञानी गजुरेलोपनामकः ॥५२॥
अन्ये सन्यासिनः प्राज्या क्षत्रिया धर्ममाश्रिताः ॥
आनन्द गिरि भूर्तेल सत्यवक्ता जनप्रियः ॥५३॥
प्रेमरामौ महासन्तौ नन्दोत्तरेण भूषितौ ॥
भारद्वाज–कुलोंत्पन्नौ नीरौलावंशदीपकौ ॥५४॥
भारतद्वाज कुलेजाता तारा गङ्गा सपत्निका :
वैष्णवाः सम्भविष्यन्ति सदाचारपरायणाः॥५५॥
कौशिकगोत्रजो धीमान् स्वामी नरहरिस्तथा ॥
तीर्थस्नायी तपःकर्ता भविता मोक्षसाधकः ॥५६॥
पत्नीपुत्र्यौ पुनस्तस्य सन्यासिन्यौ भविष्यतः ॥
साधव आगमिष्यन्ति सौम्यालंकार भूषिताः ॥५७॥
अनुष्ठानेन स्थास्यन्ति विधाय मठ मन्दिरम् ॥
राजर्षिसदृशा श्चान्ये जमुना शारदादयः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सुधिया आगमिष्यन्ति वर्धयिष्यन्ति ते सुखम् ॥५८॥
तुलसी केशवोऽग्निश्च सूर्यनारायणो गुरु :
हुतराजश्च खेमश्च युवराजाद्यनेकशः ॥५९॥
विद्यार्थिनो भविष्यन्ति पठनाय हि तत्र वै
भविष्यति गुरुस्तेषां नरपति हि कीर्तितः ॥६०॥
यस्तारा धर्म आकाशे तारेवातीव शोभते
खुरगंगातटे सम्यक् करिष्यति महत्तपः ॥६१॥
ईशार्पितमनोबुद्धिरीश्वरपरमप्रियः ।
तीर्थस्नायी विशुद्धात्मा भविता भगवत्प्रियः ॥६२॥
धीमन्तौ रामज्ञानौद्वौ लोकनाथश्च वैष्णवः
भारद्वाजा भविष्यन्ति ताराया हितकारिणः ॥६३॥
रामःश्रेष्ठकुलोत्पन्नः सदाचारी हरिप्रियः
उदारः स महादानी यदाकदाऽऽगमिष्यति ॥६४॥
ज्ञात्वैवं वासुदेवस्य पुत्रो महेन्द्रपण्डितः ।
देवी शरण सन्तश्च कोइराले त्युपनामक ॥६५॥
त्रलोक्यनाथ -भोलाच तथान्ये भगवत्प्रियाः ।
निरोलाकुलसम्पन्नौ गङ्गा-खेमौ च दम्पती ॥६६॥
तीर्थस्नानाय ते जग्मु र्हरिद्वारपुरीं प्रति ।
कुम्भस्नानेन संसिद्धा विध्यनुष्ठानपूर्वकम् ।
आनीय च शिलारूपं स्थापयिष्यन्ति शंकरम् ॥६७॥
सहयोगबलाः सभ्या निर्माय मन्दिरं शुभम् ॥
पूजाविधिं करिष्यन्ति श्रद्धया परया सदा ॥६८॥

सरलसरसभावाः सज्जना ब्रह्मनिष्ठाः
हृदयहरिनिवासाः शीलवन्तो महान्तः ॥
कृतहृदयपवित्रा लोकसेवासु लग्नाः
सकलभुवनमेते सर्वदा पावयन्ति ॥६९॥

इतिश्रीगोपेश्वरमाहात्म्ये सज्जनवर्णनंनाम षष्ठोध्यायः ॥६॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

षष्ठ अध्यायको सारांश

बँदेलको रूप लिएर मूक दानव अर्जुनलाई मार्न आयो । अर्जुनले आफूलाई लक्ष्य गरी आएको बुझेर बाण प्रहार गरे भने शिवले पनि भक्त रक्षा गर्न वाण प्रहार गरे । एकैचोटी प्रहार भएका वाण लाग्नाले त्यो दैत्य मर्यो । किराँतरूप शिव मैले मारेको भन्ने र अर्जुन पनि मैले मारेको भन्ने भए । दुवैको वादविवाद भयो । होडबाजी चल्यो । शस्त्रास्त्र प्रयोग गर्दै युद्ध गरे । शस्त्रास्त्र विफल भए पछि मल्लयुद्ध चल्यो । शिवले अर्जुनलाई पछारिदिनुभयो । पछारिए पछि पछार्ने को वीर रहेछ, भनी मनन गरी हेर्दा किरातरूपधारी शिव भगवान् भनी अर्जुनले पहिचान गर्नुभयो र श्रद्धाले विभोर भएर ८ श्लोकले स्तुति गर्नु भयो । स्तुतिबाट खुशी भएका शिवले वरदान मांग भने पछि अर्जुनले पाशुपतास्त्रको वरदान माग्नु भयो । शिव भगवान्ले पाशुपतास्त्र प्रयोग उपसहार विधि समेत प्रदान गर्नुभयो । अर्जुनले स्नानादि विधिले शुद्ध भएर ग्रहण गर्नुभयो । यता इन्द्रादि देवताहरूले पनि खुशी भएर अर्जुनलाई आफ्ना आफ्ना अस्त्र प्रदान गरे । तेह्रथुम भन्नेठाउँमा शिलारूप बनेकी देवीको पूजा सम्मान भएको देखेर शिव भगवानले मेरो पनि पूजाविधान् होस् भनी सदाचारी सज्जनहरूको हृदयमा प्रवेश गरेर प्रेरणा गर्नुभयो । देवखातविल (ओडार)का वरिपरि गोपेश्वर भगवानको स्थापना पूजा पाठ द्वारा श्रेय एवं ख्याति वृद्धि गराउने सन्यास, सन्त भक्तहरू, माहात्मा र सज्जनहरू पहिले देखिनै भए र पछि पनि यस्ता सज्जनहरू हुदै रहनेछन् भनिएकोछ । जस्तै - सलबहादुर खत्री, उनका पुत्र विज्ञानमा विद्वान जगतकेसी होलान् अरु प्रभुराम खत्री, भीमबहादुर खत्री, श्रीप्रसाद खत्री र उनकी जेठी धर्मपत्नी, पूर्णप्रसाद बजगाँइ, महानन्द र प्रजापति लुइटेल, गाउँ अन्त्य (पुछारमा घरहुने खेमनाथ निरौला, अग्निप्रसाद खत्री, मानध्वज खत्री (मदन), रामकृष्ण खड्का, चुडामणि दाहाल र अरु भक्त धर्मात्मा र ख्याति प्रसिद्धि पाएका विभिन्न व्यक्ति पनि पिप्ले र आसपासमा नागदह, सोल्मा, साब्ला आदि गाउँमा हुनेछन् भनियो । लप्टन छविलाल ढुंगाना, पुण्यप्रसाद ढुंगाना, भानुभक्तकी पत्नी रुक्मिणी ढुंगाना उनका नाती शंकर ढुंगाना पुण्यप्रसादकी बुहारी द्वारिका ढुंगाना पदमप्रसादका पुत्र जयप्रसाद ढुंगाना आदिको नाम पनि उल्लेख गरियो । मौद्गल्य गोत्रका श्री भक्त, महिपति र त्रिलोचन पिप्लेमा हुनेछन् भने त्यहीँ गुफामा एक गोविन्द शरण वैष्णव तीर्थाटन गर्दै आएर तपस्या गरी बस्नेछन् । यस गुफाका नजिकै

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

परोपकारी वुद्धिमान र वैष्णव धर्मावलम्वी दिनप्रसाद निरौला "महाजन" भनिने प्रसिद्धि लिएर रहने र उनकी धर्मपत्नी कौशिला नामकी सरल स्वभावकी रामकी माताझैं रहनेछिन् र दीनप्रसादका कपिल, भीम, वोधराज, हुतराज, खेमनाथ, भोलानाथ र यमनाथ निरौला नामक सातपुत्र हुनेछन् । यसैगरी वृद्धिलाल र दिव्येश्वरीका पुत्र पं. तुलसी प्रसाद घिमिरे हुनेछन् । साथै चन्द्रलाल, कृष्णलाल, नरपति, पद्मलाल, नारद, वेदनीधि आदि निरौला र दुर्गाप्रसाद, इन्द्र विलाश गड्तौला पनि हुनेछन् भनिएकोछ । पं कृष्णप्रसाद अधिकारी (तम्फुला), पं केशव ढुंगाना धेरैका गुरु जंगलाल निरौला विद्यापति भट्टराई, गोविन्द शरण दाहाल आदि सज्जनहरू पिप्लेमै हुनैछन् साथै आसपास सोल्मामा पं. नारायण प्रसाद खनाल, पं. चूडमणि तिम्सिना, पं. खिलानाथ अधिकारी, पं. पद्मनाभ लुइटेल र रामचन्द्र निरौला, शिवप्रसाद ढुंगाना अनि म्याङलुङ वजारमा शंकरमान श्रेष्ठ र उनका गुरु गजुरेल, वद्रीनारायण, कृष्णनारायण, शिवनारायण श्रेष्ठ र उनकी माता लक्ष्मी देखा पर्नेछन् । प्रेमानन्द र रामचन्द्र निरौला, नरहरी ढुंगाना र उनका पत्नी र पुत्री समेत सन्यास हुनेछन् । तारानिधी निरौला र गंगा निरौला पत्नी सहित वैष्णव हुनेछन् । जमुना गिरी, शारदा गिरी र आनन्द गिरी जस्ता सन्यास पनि वाहिरबाट आएर बस्ने र घुम्ने गर्नेछन् । तुलसी घिमिरे, युवराज गड्तौला, गुरुप्रसाद गड्तौला, अग्निप्रसाद दाहाल, केशव ढुंगाना हुतराज निरौला, सूर्य नारायण ढुंगाना खेमनाथ निरौला आदि विद्यार्थी त्यहीँ पिप्लेमा पढ्ने छन् र पं. नरपति भण्डारी त्यहाँ सस्कृत पढाउनु हुनेछ । खोरुङ्गा खोला किनारमा त्रैलोक्य शरण खतिवडा तपश्या गरी बस्नेछन् उनलाई रामप्रसाद लोकनाथ र ज्ञाननाथ सुवेदीले सहयोग गर्नेछन् । श्रेष्ठ कुलमा भगवान भक्त दान दिन इच्छुक रामबहादुर ताल्चा भडेल जस्ता दानी सज्जन पनि कहिले कहिले त्यहाँ आउने छन् । बासुदेवका छोरा पं. महेन्द्र निरौला, खेमनाथ निरौला, गंगादेवी निरौला, भोला ढुंगाना, त्रैलोक्य नाथ निरौला, देवीशरण कोइराला आदि कुम्भ मेलाको अवसरमा हरिद्वार गएर शिवलिङ्ग ल्याई पिप्ले गुफाम मन्दिर बनाई गोपेश्वर नामकरण गरी पूजा अर्चना गर्नेछन् । यस्ता साधु सन्त धर्मात्मा र सज्जनहरूले लोककल्याणकारी काम गरेर पृथ्वीलाईनै सदा पवित्र राख्नेछन् भनी हाम्रा केही पूर्वज र केही वर्तमान समयका साधुसन्त धर्मात्मा, विद्वान र सज्जनहरूको वर्णन छैठौं अध्यायमा भएकोछ ।

श्री गोपेश्वर माहात्म्य अन्तर्गत सज्जन वर्णन नाम षष्ठ अध्याय

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अथ सप्तमो ध्यायः

शौनक उवाच

ईशकथामृतेनाद्य हे सूत ? पाविता वयम् ॥
अग्रेऽपि श्रोतुकामाः स्मो भक्तचरित्रमद्भुतम् ॥१॥
सर्वोपनिषदो जाता वेददर्शनसम्मता ॥
चरित्रसुजला गङ्गा पातु वो नो युगे युगे ॥२॥

सूत उवाच

स्कन्देन कथितोदन्तमैक्यं केशवरुद्रयोः ॥
यं यं स्मरामि तं तं च शौनक ? कथयामि ते ॥३॥
अच्युतोऽस्मि महादेव ? तव कारुण्यलेशतः ॥
विज्ञानधन एवास्मि शिवोऽस्मि किमतः परम् ॥४॥
न निजं निजवद्भाति चान्तःकरणजृम्भणात् ॥
अन्तःकरणनाशेन संविन्मात्रस्थितो[1] हरिः ॥५॥
संविन्मात्रस्थितश्चाहमजोऽस्मि किमतः परम् ॥
व्यतिरिक्तं जडं सर्वं स्वप्नवच्च विनश्यति ॥६॥
चिज्जडानां तु यो द्रष्टा सोऽच्युतो ज्ञानविग्रहः ॥
स एवहि महादेवः स एव हि महाहरिः ॥७॥
शिवाय विष्णुरूपाय शिवरूपाय विष्णवे ॥
शिवाय हृदयं विष्णुर्विष्णोश्च हृदयं शिवः ॥८॥
अभेददर्शनं ज्ञानं ध्यानं निर्विषयं मनः ॥
स्नानं मनो मलत्यागः शौचमिन्द्रियनिग्रहः ॥९॥
ब्रह्मामृतं पिवेद् भैक्षमाचरेद्देहरक्षणे ॥
वसेदैकान्तिको भूत्वा चैकान्ते द्वैतवर्जिते ॥१०॥उपनिषद्
इत्येवमाचरेद् धीमान् स एवं मुक्तिमाप्नुयात् ॥
वेदान्तोपनिषत्तत्वं ज्ञातव्यं सूरिभिर्मुहुः ॥११॥
एकदा पुण्यक्षेत्रेऽस्मिन् किरातराज्यमण्डले ॥
देवशर्मा सुधीरासीत् ब्राह्मणः कृषिकर्मकृत् ॥१२॥
स्वजीविकां करोति स्म स्ववाहुवलकर्मणा ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भार्यासीत् शीलसम्पन्ना शीलनाम्ना सुभूषिता ॥१३॥
तस्य पुत्रोऽपि सञ्जातश्चन्द्रमा इव सुन्दरः ॥
स पञ्चहायनो जातो दैवमायात कष्टदम् ॥१४॥
पिटिकां ब्राह्मणे दृष्ट्वा दैवीमायां दुरत्ययाम् ॥
नराः कोलाहलं चक्रुरोगाक्रमणसाध्वसात् ॥१५॥
पूर्वमपि हि तत्क्षेत्रे विस्फोटरोगविस्तृतात्[२] ॥
असंख्यका नरा नार्यः प्राणहीनास्तदाऽभवन् ॥१६॥
तत्छुत्वा शवरो श्रेष्ठ सेनासहित आगतः ॥
ब्रणनियन्त्रणायैव[३] ग्रामान्निःसारयच्च तान् ॥१७॥
पत्न्या पुत्रेण संयुक्तो पिटिकाब्रणपीडितः[४] ॥
स विपिनं गडीश्रृङ्गं[५] गतवान् कालचोदितः ॥१८॥
देवशर्माऽपि सर्जस्य मूल उवास दुःखितः ॥
पीडितः शीतवातैश्च दैवगत्या दिवङ्गतः ॥१९॥
सुशीला पुत्रमादाय वनमध्ये रुरोद सा ॥
हे कृष्ण हे रमानाथ गोपेश्वर महेश्वर ॥२०॥
सिंहवाहिनि ? हे दुर्गे ? प्रस्थभरे ? महेश्वरि ? ॥
प्रत्यक्षं चेत् समागत्य रक्ष मां भुवि वर्तसे ॥२१॥
तदानीमेव वृद्धैका समिद्भारवहा सती ॥
का रोदिति किमर्थं च वदन्ती समुपस्थिता ॥२२॥

ब्राह्मण्युवाच

मातःपश्य पतिं मेऽद्य दुरवस्थं तथा च माम् ॥
निष्कासितां समाजेन क्व गच्छामि करोमि किम् ॥२३॥

सूत उवाच

तस्या आर्तिविनाशाय साऽऽजुहाव जनान् तदा ॥
जनसमूह आगत्य चकारान्त्यविधिं समम् ॥२४॥
वृद्धयाश्वासिता सापि शान्तिं प्राप्य स्थिराऽभवत् ॥
मातः प्रतिदिनं मां त्वं शामय सेत्युवाच ह ॥२५॥

२.फोडा खटीरा ३.घाउ ४.माइखटिरा ५. गण्डीको थुम्का ७. बुढी आमा

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पुत्रस्तु पिटिकामुक्तः तथा माता च पीडिता ॥
वालः संकटमापन्नः पलिक्नीमाजुहाव सः ॥२६॥
स वालः श्रुतवान् शब्दान् वनमध्यात् समागतान् ॥
गोपमाह्वय हे वाल स सेवां ते करिष्यति ॥२७॥
तीव्रवेदनया युक्ता पुत्रस्नेहेन विह्वला ॥
उवाच वालकं सापि सहयोगी स एव हि ॥२८॥

वाल उवाच

गोविन्द? गोकुलपते नवनीतचौर
भक्तार्तिनाशक ? हरे ? करुणासमुद्र ? ॥
आर्तः समाह्वयति सैष निरन्तरं त्वाम्
हे गोप पालय सखे शरणागतं माम् ॥२९॥
निष्कासितोऽस्मि निखिलात् स्वजनात् समाजात् ॥
तातः परम्पदगतः पिटकप्रभावात् ॥
रोगातुरास्तिजननी शयने समीपे
हे गोप ? पालय सखे शरणागतं माम् ॥३०॥
क्षुत्पीडितं सलिलभोजनवस्त्रहीनं
सन्त्रासितं नृ–पशु–पक्षि–सरीसृपैश्च ॥
यं प्रान्तरस्थमनिशं सहयोगशून्यं
हे गोप पालय सखे शरणागतं माम् ॥३१॥
गच्छन् स भानुरपि जीवनिकायमित्रो
रात्री तथातिभयदा सविधा गताऽस्ति ॥
मात्रोक्तसद्वचसि विश्वसितं विपन्नं
हे गोप पालय सखे शरणागतं माम् ॥३२॥
यद् यद् कृतं प्रथमजन्मनि दुष्टकर्म
तत् कर्मणो हि विधिना फलभागिदानीम् ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दैवेन दुर्गतजनं शरणे प्रपन्नं
हे गोप पालय सखे शरणागतं माम् ॥३३॥
माता पिता गुरुरसि स्वजनः त्वमेव
पश्वन्नवस्त्र–गृह–मित्र– धनं त्वमेव ॥
प्राणाः शरीरमपि नैव च मे त्वदन्यत्
हेगोप पालय सखे शरणागतं माम् ॥३४॥
धात्रा ललाटफलके लिखितं स्वभाग्यं
सर्वं सहे हि दुरितं सुकृतं समग्रम् ॥
मां पासि चेत् त्वमधुना तव च प्रभावं
हे गोप पालय सखे शरणागतं माम् ॥३५॥
नायाहि गोप ? मम कष्टनिवारणाय
आर्तार्तिनाशनपरायण ? दीनवन्धो? ॥
आयामि तेऽद्य निकटे स्वतनुं विहाय
हे गोप पालय सखे शरणागतं माम् ॥३६॥
गोपाष्टकमिदं स्तोत्रं यः पठेत् श्रद्धयान्वितः ॥
जन्मान्तरे कृतं पापं तस्य सर्वं विनश्यति ॥३७॥
वालस्य सहयोगार्थं गोपवालः समागतः ॥
सान्त्वयामास तं वालं मधुरै र्वचनै स्तदा ॥३८॥
उवाच वालकं गोपो मातू रोगनिवृत्तये ॥
मया सार्धं समायाहि चानेतुं जलमौषधम् ॥३९॥
जलपात्रं गृहीत्वा स गोपमनुजगाम ह ॥
उल्लंघ्य पर्वतं नीचैर्ययौ तेन शनैः शनैः ॥४०॥
स्रोतसो जलमादाय प्राविशत् गह्वरं तदा ॥
प्रोवाच वालकं गोपः शिलां जलेन सिञ्चितुम् ॥४१॥

गोप उवाच

आराध्य एष मे देवः शिलारूपो महेश्वरः ॥
जलाभिषिञ्चनादेव रोगान् नाशयति प्रभुः ॥४२॥
अतस्त्वमपि हे वाल? मन्त्रानिमान् पठन् मुहुः ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मात्रा सह समागत्य जलेन कुरु सिञ्चनम् ॥४३॥
लम्वाजलेन यो भक्त्या सिञ्चयति महेश्वरम् ॥
लूताविस्फोटका रोगाः तस्य नश्यन्ति सर्वदा ॥४४॥
पिङ्ग्वाजलं समादाय जलधारां शिवोपरि ॥
यः करोति स दीर्घायु र्धनवान् पुत्रवान् भवेत् ॥४५॥
खुरगङ्गाजलेनैवं रुद्राभिषेककर्मणा ॥
ग्रहदोषा विनश्यन्ति श्रीकृष्णश्च प्रसीदति: ॥४६॥

जलार्पणमन्त्रः

हे शम्भव? नमस्तेऽस्तु मयोभव? नमो नमः ॥
हे शंकर ? नमस्तेऽस्तु मयस्कर ? नमो नमः ॥४७॥
शिव ? शिवतर ? त्र्यंक्ष? सर्वारिष्टविनाशक? ॥
मयार्पितं जलं देव ? गृहाण परमेश्वर ? ॥४८॥
ॐ नमः शिवाय इति ।
गोपेश्वरस्य माहात्म्यपाठेन पूजेनेन च ॥
पञ्चामृताभिषेकेन रुद्रीपाठेन कर्मणा ॥४९॥
नरैः कृतेन पुण्येन श्रावणे सोमवासरे ॥
प्रसन्नः शंकरो भूत्वा तेभ्यः शान्तिं प्रदास्यति ॥५०॥
यत्र पिटिकया स्तब्धा निश्चेष्टा खिन्नमानसा ॥
मातास्ति निर्जनेऽरण्ये तत्र गच्छाव सत्वरम् ॥५१॥

सूत उवाच

कृत्वा रुद्राभिषेकं स सगोपो मातरं स्मरन् ॥
आगमत् सत्वरं यत्तद् जनन्यधिष्ठितं वनम् ॥५२॥
समिद्भारवहा वृद्धा प्रगता मातृसन्निधेः ॥
गच्छता तेन वालेन दृष्टा वृक्षे न्यलीयत ॥५३॥
सहागतं सखायं च स गोपं दृष्टवान् तथा ॥
गोपोऽप्याकाशमार्गेण गच्छन्नन्तर्न्यलीलयत ॥५४॥
तत उदितवान् सूर्यो जगन्मित्रः प्रतापवान् ॥
मातापि जलमापीय नीरोगा सवला भवत् ॥५५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रूपं तयोः स्मरन्तौ तौ मातापुत्रौ मुदन्वितौ ॥
गोपेश्वरस्य देव्याश्च जज्ञतुर्महतीं कृपाम् ॥५६॥
लम्व्वापिङ्गवाखुरङ्गाणां जलेन स्नानपूर्वकम् ॥
गोपेश्वरं सपुत्रा सा स्नापयामास भक्तितः ॥५७॥
गोपेश्वरः प्रभारूपं दर्शयामास सुन्दरम् ॥
उवाच परमप्रीतः यथेच्छं याच्यतां वरम् ॥५८॥

ब्राह्मण्युवाच

कर्ता भर्ता तथा हर्ता सवर्ज्ञस्त्वमसि शिवः ॥
अस्मच्छ्रेयो भवेद् येन गोपेश्वरः? विधेहि तत् ॥५९॥

गोपेश्वर उवाच

आयुरनामयं वंशे भूयाद्धर्मे स्थिरा मतिः ॥
ऐश्वर्यं प्रचुरं तेऽस्तु पश्चिमं याहि सुब्रते ? ॥६०॥

सूत उवाच

एवमुक्त्वा ततःसद्यो ज्योतिरूपो न्यलीयत ॥
पुत्रेण सहिता सापि यथाज्ञासीत् तथा करोत् ॥६१॥

इति श्रीगोपेश्वरमाहात्म्ये भक्तचरित्रवर्णनं नाम सप्तमोऽध्याय

सप्तम अध्यायको सारांश

गोपेश्वरको सर्वप्रथम पूजा सम्मान गर्ने भक्तका बारेमा शौनकले सोध्नु भयो । सूतजीले उपनिषद्मा शिवका हृदय विष्णु र विष्णुका हृदय शिव हुन् भनी अभेद बुझाउदै एक भक्तको चरित्र सुनाउछन् । देवशर्मा नाम गरेका विद्वान ब्राह्मण थिए । आफ्नै बाहुबलले खेती किसान गरी जीविका चलाएर बसेका थिए । सुशीला नाम भएकी श्रीमती थिइन् । छोरो चन्द्रमा जस्तै सुन्दर थियो । छोरो ५ बर्षको अवस्थामा माई खटिराको दैवी प्रकोप फैलियो । मानिसहरू आत्तिए । पहिले पनि त्यस क्षेत्रमा त्यस्तो रोग फैलिएर धेरै मानिसहरू मरेका थिए । शवर वशका ठूलाबडाले थाहा पाए । फैलिन्छ भनेर गाउँबाट त्यो परिवारलाई निकालिदिए । देवशर्मा परिवार सहित गडीथुंको जंगलमा गएर वृक्षका फेदमा वसे । छोरालाई पनि खटिरा भए । ती सुशीलालाई ठूलो आपत पर्यो । देवशर्मा त्यसै खटिराको प्रकोपले दिवंगत भए । सुशीला छोरालाई काखमा लिएर हे कृष्ण ! हे रमानाथ ! हे गोपेश्वर हे महेश्वर हे दुर्गे हे प्रस्थभरे देवी भन्दै हूँ हूँ रोइन् । त्यो

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नारी रोदन देवीदेवताले सुनिदिनु भयो । दाउराको भारी बोकेकी बुढी, को रुन्छ ? भन्दै आइन् । ब्राह्मणीले भनिन् । पतिको यो (देखाउदै) अवस्था भयो । गाउँलेबाट निकालिएकी हूँ म । के गरूँ कहाँ जाउँ भन्दै डाको छोडिन् । बृद्धा माताले आफ्ना जनलाई हपारिन् । जन समूह आएर देवशर्माको अन्तिम संस्कार गरिदिए । बृद्धाले सुशीला र छोरालाई आस्वासन दिदै शुभाशीर्वाद दिइन् । छोरा माई खटिराबाट मुक्त भयो । सुशीलालाई पक्डियो । आमा वेहोस भइन् । बालकले बूढी आमा भनेर बोलायो । हे बाबु ! गोपाललाई बोलाऊ । त्यसले तिम्रो सहयोग गर्नेछ । चेष्टा रहित भएर लडेकी आमा सुशीलाले पनि सुनेर छोरालाई भनिन् – हे बाबु ! तिमीलाई त्यही गोपालले सहयोग गर्नेछ ।

बालकले रुदै हे गोविन्द हे गोपाल भन्दै गुन्गुनायो । गुनगुनाएको भाव वसन्ततिलका छन्दमा आठ श्लोकले व्यक्त गरिएको छ । यसलाई गोपाष्टक भनिन्छ । यो स्तोत्र जसले श्रद्धाले पाठ गर्दछ त्यसका जन्म जन्मान्तरका सारा पाप नाश हुन्छन् । कष्टबाट मुक्त हुन्छ । त्यस बालकको सहयोग गर्न गोप बालक आउनु भयो । रातको बेलामा पर्वत नाघेर उम्रिएको पानी लिएर गुफामा प्रवेश गरी शिलामा पानी चढाउन लाउनु भयो र भन्नुभयो । लम्वा नदीको पानीले यहाँ स्नान गराउनाले लूतो खटिरा निको हुन्छ । पिङ्वाको पानीले स्नान गराउनाले संपत्ति ऐश्वर्य बढ्दछ । खोरुङ्गाको पानीले स्नान गराउनाले ग्रहदोष नाश हुन्छन र भगवान् कृष्ण खुशी हुनुहुन्छ । पञ्चामृतले शिवमन्त्र उच्चारण गर्दै स्नान गराउनाले सबैसिद्धि मिल्दछ । यसरी सम्झाएर आमा भए ठाउँमा लिएर जानुभयो । उता आमाको छेउवाट तिनै बृद्धा रुखतिर छेलिदै गरेको बालकले देखे । गोपालतिर हेर्दा गोपालआकाश मार्ग गरेर हिड्दै अदृश्य भए । सूर्य झुल्किए पछि त्यो जल आमालाई दिए । आमा बिस्तारै निको हुंदै गइन् । बालकले गोपालसँग भएको सबै सुनाए । निकी भएर आमा छोराले लम्वा पिङ्वा र खोरुङ्गा खोलाको पानी ल्याएर त्यही ओडारमा प्रवेश गरी शिवलाई चढांए । र जाने संम स्तुति गरे । गोपेश्वर भगवान्‌ले ज्योतिरूप दर्शन् दिएर आयु आरोग्य ऐश्वर्य पूर्ण हुने वरदान दिनुभयो र हराउनुभयो । ती आमा छोरा पश्चिमतिर गए धनधान्य ऐश्वर्यले पूर्ण सुखी बने । इति गोपेश्वर माहात्म्य भक्तचरित्र वर्णननाम सप्तम अध्याय ॥७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अथाष्टमोध्यायः

शौनक उवाच

भक्तकथामृतेनाद्य सञ्जीविता वयं पुनः ।
हे सूत ? श्रोतुमिच्छाम उपनिषत्सु वर्णितम् ॥१॥
कैस्तत्वैर्जायते देहः कथं स च विनश्यति ॥
जीवः कः ईश्वरः कश्च सर्वमेतद् प्रवोधय ॥२॥

सूत उवाच

भवद्भिः कृतसंप्रश्नः सारगर्भित उत्तरम् ॥
विचार्यैवोच्यते शास्त्रं नराणां मुक्तिहेतवे ॥३॥
नरैर्विचारणीयं यत् किं साधनचतुष्टयम् ॥
कानि तेषां च नामानि विविच्य कथयाम्यहम् ॥४॥
अनित्यनित्यवस्तूनां विवेक एकसाधनम् ॥
इह परत्र भोगार्थे वैराग्यं द्वितीयं मतम् ॥५॥
शमादिषट्कसम्पत्तिः साधनं तृतीयं तथा ॥
मोक्षेच्छासाधनं चैव तत्साधनचतुष्टयम् ॥६॥
एवं ब्रह्म नित्यवस्तु जीवो ब्रह्मैव नापरः ॥
तद्भिन्नं वस्तु यत्सर्वं परिणाम्यसदुच्यते ॥
अनित्यनित्ययोर्ज्ञानमेतदेव हि वर्णितम् ॥७॥
इह लोके तथा स्वर्गे भोगेच्छा नश्यते सदा ॥
स एव हि विरागः स्यादुत्तमो मोक्षदायकः ॥८॥
शमादिषु च षट्केषु मनसो निग्रहः शमः ॥
नेत्रादीनि च वाह्यानि चेन्द्रियाणि दमो मतः ॥९॥
अनुष्ठानं स्वधर्मस्य वदन्त्युपरतिं वुधाः ॥
शीतोष्णसुखदुःखानां तितिक्षा सहनं मता ॥१०॥
गुरुवेदान्तवाक्येषु श्रद्धा विश्वास उच्यते ॥
चित्तस्यैकाग्रता नित्यं समाधानं निगद्यते ॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मुमुक्षुत्वं हि मोक्षेच्छा तत्साधनचतुष्टयम् ॥११॥
एतेषां साधनां सम्यग् यः करोति तदन्तरम् ॥
अधिकारी भवेत् सैष तत्वज्ञानं करोति च ॥१२॥
येन तत्वविवेकः स्यात् यथार्थं वच्मि भार्गव ? ॥
आत्मनो लक्षणं पूर्वं ततस्तत्वस्य लक्षणम् ॥१३॥
जीवात्मा परमात्मा च स आत्मा द्विविधस्तथा ॥
प्रतिशरीरमात्मा य उपाधिभिर्विभूषितः ॥१४॥
कर्मफलं शरीरस्य भुञ्जन् भ्रमति योनिषु ॥
समवायेन जन्यत्वज्ञानाधिकरणं हि सः ? ॥१५॥
भिन्नोऽपि व्यापको नित्योऽसंख्यो जीवस्य लक्षणम् ॥
क्लेशेन कर्मणा नित्यं विपाकेनाशयेन च ॥
सम्बन्धरहितश्चैष पुरुषोत्तम ईश्वरः ॥१७॥
सच्चिदानन्दरूपः सन् सर्वज्ञः सर्वशक्तिमान् ॥
सर्वत्र व्यापको नित्यस्तथा स एक एव हि ॥१८॥
एष नारायणः कृष्णः शिवः परात्परः प्रभुः ॥
भिन्नदृष्ट्या तथा वाचा स चैको भिन्नतां गतः ॥१९॥
क्लेशकर्मादियुक्तस्य जीवस्य मोक्षसाधनम् ॥
कर्तुं शक्नोति जीवेषु मुमुक्षुर्ज्ञानवान् नरः ॥२०॥

शौनक उवाच

इदं स्थूलशरीरं किं किं सूक्ष्मशरीरं कथम् ॥
कति तत्वानि सन्त्यस्मिन् समासेन प्रवोधय ॥२१॥

सूत उवाच

महाभूतानां पञ्चानां पञ्चीकृतैश्च कर्मभिः ॥
सुखदुःखादिभोगाय जातं स्थूलकलेवरम् ॥२२॥
षड्विकारमयं गात्रं जायतेऽस्ति च वर्धते ॥
विपरिणमतेऽपक्षीयते तच्च विनश्यति ॥२३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पञ्चीकृतैश्च भूतैश्च निर्मितं यत्कलेवरम् ॥
कर्मजन्यसुखादीनां यद्भोगसाधनं मतम् ॥२४॥
तिष्ठति सूक्ष्मवर्ष्मैतत् सप्तदशकलात्मकम् ॥
ज्ञानेन्द्रियाणि पञ्च स्युस्तथा कर्मेन्द्रियाणि च ॥२५॥
पञ्चप्राणा मनो वुद्धिरेता उक्तकलाः स्मृताः ॥
श्रोत्रं त्वग् रसना घ्राणं चक्षुर्ज्ञानेन्द्रियाणि च ॥२६॥
कर्मेन्द्रियाणि वाक् पाणिः पादः पायुर्भगं तथा ॥
एतेषां देवताः ज्ञेयाः श्रोत्रादीनां कमाद् वुधैः ॥२७॥
दिङ्मरुद् वरुणो दश्रौ सूर्यो वह्निः पुरन्दरः ॥
दशैव देवताः सन्ति विष्णुर्मृत्युः प्रजापतिः ॥२८॥
श्रोत्र-दृग्-रसना-चर्म-घ्राणानां विषयाः कमात् ॥
शब्द-रूप-रस-स्पर्श-गन्धानां ग्रहणं कृतम् ॥२९॥
वाक्-पद्-दो-भग-पायूनां विषयाः कमशो यथा ॥
भाषणं गमनं वस्तुग्रहणं शं विसर्जनम् ॥३०॥
यत्कारणशरीरं तद् ज्ञातव्यं निर्विकल्पकम् ॥
मायाऽनिर्वचनीयास्ति साऽविद्याऽनाद्यसत्तथा ॥३१॥
अज्ञानं सत्स्वरूपस्य शरीरं कारणं मतम् ॥
ब्रह्मज्ञानेन भक्त्या च सर्वदा नश्यते च सा ॥३२॥
तिस्रोऽवस्थाः सदा ज्ञेया जाग्रत्स्वप्नसुषुप्तयः ॥
शब्दादिविषयैर्ज्ञानेन्द्रियैर्जाग्रत् प्रतीयते ॥३३॥
स्थूल देहाभिमानी स आत्मा विश्वः प्रचक्ष्यते ॥
जाग्रति कल्पितं दृष्टं निद्रायां तत्प्रतीयते ॥३४॥
स स्वप्नः सूक्ष्मदेहाभिमान्यात्मा तैजसः स्मृतः ॥
किमप्यहं न जानामि मया निन्द्रा ऽन्वभूयत ॥३५॥
सुषुप्तिः सा सुखेनैव स मानी प्राज्ञ उच्यते ॥
आनन्दमयकोशाख्यः वासनाभोगवानिति ॥३६॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शरीरेऽस्मिन् पञ्चकोशाः स्थूलसूक्ष्मादयस्तथा ॥
अन्नरसेन संपुष्टः कोशोन्नमय एव सः ॥३७॥
प्राणापानसमानोदानव्यानमरुतां तथा ॥
प्राणमयो भवेत्कोशः पायु-र्दो-भग-वाक्-पदाम् ॥३८॥
कोशो मनोमयः प्रोक्तो मनोज्ञानेन्द्रियात्मकः ॥
स विज्ञानमयः कोशो वुद्धिज्ञानेन्द्रियात्मकः ॥३९॥
यत्कारणशरीरं तदविद्यायां स्थितं तथा ॥
प्रियमोदादिवृत्तित्वं रजस्तमोगुणान्वितम् ॥४०॥
सदानन्दमयः कोश इष्टप्राप्तौ सुखान्वितः ॥
जानात्यात्मा मदीयत्वमेतद्धि कोशपञ्चकम् ॥४१॥
कटककुण्डलादीनि स्वस्मादि्भन्नं यथा तथा ॥
कोशस्तु ज्ञातृसम्बन्धः साक्ष्यात्मा भिन्न एव हि ॥४२॥
मायां ब्रह्माश्रयां विद्धि स्वभावं प्रकृतिं खलु ॥
ततस्तत्वं महत्तस्मादहंकारो गुणान्वितः ॥४३॥
तत आकाश उद्भूतः आकाशाद्वायुरन्वभूत् ॥
वायोस्तेजस्तत आपः पृथिव्यद्भ्यश्च निर्गता ॥४४॥
नभसः सात्विकांशेन श्रोत्रेन्द्रियमभूत् ततः ॥
मरुतः सात्विकांशेन त्वगिन्द्रियमभूत् पुनः ॥४५॥
तेजसः सात्विकांशेन सम्भूतं चक्षुरिन्द्रियम्॥
जलस्य सात्विकांशेन सम्भूतं रसनेन्द्रियम् ॥४६॥
पृथिव्याः सात्विकांशेन घ्राणेन्द्रियं च सम्भवम् ॥
समष्टिगतपञ्चानां सात्विकांशेन वै पुनः ॥४७॥
हृद्ध्यहंकारचित्तान्तःकरणान्यभुवन्निति ॥
संकल्पस्य विकल्पस्य कारणं मन उच्यते ॥४८॥
मनसो देवता चन्द्रो दुर्जेयं चञ्चलं मनः ॥
कार्यज्ञानं च यस्याःस्यात् सा वुद्धिर्निश्चयात्मिका ॥४९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

महत्तत्वात्मकं चित्तं शुद्धं सत्वेन संयुतम् ॥
तस्मिन्नधिष्ठितो देवो वासुदेवः स एव हि ॥ ५०॥
शान्तं चित्तं महत्तत्वं सत्वगुणमयं च तत् ॥
स्वच्छत्वमविकारित्वमेतत् चित्तस्य लक्षणम् ॥५१॥
महत्तत्वात् विकुर्वाणात् भगवद्वीर्यसम्भवात् ॥
क्रियाशक्तिरहंकारस्त्रिविधः समपद्यत ॥५२॥
अस्य वै कारिकादंशान्मानसं समपद्यत ॥
तैजस इन्द्रियाणीति महाभूतानि तामसात् ॥५३॥
सहस्रशिरसं साक्षाद्यमनन्तं प्रचक्षते ॥
संकर्षणाख्यं पुरुषं भूतेन्द्रियमनोमयम् ॥५४॥
यद्विदुरनिरुद्धाख्यं हृषीकाणामधीश्वरम् ॥
शारदेन्दीवरश्यामं संराध्यं योगिभिः शनैः ॥५५॥
निश्चयस्मृतिनिद्राभिर्युता वुद्धिः प्रचक्ष्यते ॥
प्रद्युम्नो वुद्धितत्त्वं हि सदा ध्येयं चतुष्टयम् ॥५६॥
नभसो राजसांशेन वागिन्द्रियमभूत् ततः ॥
मरुतो राजसांशेन प्राणेन्द्रियं च संभवम् ॥५७॥
वह्नेश्च राजसांशेन पादेन्द्रियमभूत् पुनः ॥
जलस्य राजसांशेनोपस्थेन्द्रियं समुद्भवम् ॥५८॥
भूमेश्च राजसांशेन गुदेन्द्रियमभूदिति ॥
सर्वेषां राजसांशेन पञ्चप्राणा विनिर्गताः ॥५९॥
एतेषां पञ्चतत्वानां पञ्चीकृताख्यकर्मणा ॥
तामसांशात् शरीराणि जातानि प्राणिनामिति ॥६०॥

शौनक उवाच

अस्माभिः स कथं ज्ञेयः पञ्चीकरणको विधिः ॥
संक्षेपेणैव तत्सर्वं यथार्थं नः प्रवोधय ॥६१॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सूत उवाच

स्थापयेत् पञ्चभूतानामर्धभागं पृथक पृथक् ॥
चतुर्थं भागमर्धस्य तेष्वर्धेषु प्रमेलयेत् ॥६२॥
एवं विधौ समुत्पन्नमण्डं शरीरमुच्यते ॥
जायन्ते पञ्चभूतानि स्थूलरूपाणि सर्वदा ॥६३॥
अभिमानी शरीरस्य जीवो ब्रह्मैव नापरः ॥
अविद्योपाधिनायुक्तः प्रविष्टो भिन्नयोनिषु ॥६४॥
शरीरं केवलं तस्य जायते म्रियते च तत् ॥
एवं जीवगतिं स्मृत्वा ध्येयो गोपेश्वरः सदा ॥६५॥
अस्ति स व्यापकः ईशः सर्वज्ञः सर्वशक्तिमान् ॥
उपाधिरहितो नित्यम् साक्षीभूतः सनातनः ॥६६॥
जीवस्यापृथगाधार परमात्मा विराजते ॥
सोऽवतीर्य क्षितौ लीलामलौकिकीं करोति च ॥६७॥
मायया वध्यते जीव ईश्वरो न तु वध्यते ।
भगवानिति शब्देन स ईश्वरो निगद्यते ॥६८॥
अहं भगवतो मे स भगवानिति यो नरः ॥
यमादिसाधनां कुर्वन् चिन्तयति निरन्तरः ॥६९॥
अनवच्छिन्नया भक्त्या परमप्रेमरूपया ॥
भजते यो नरो नित्यं स एव लभते हरिम् ॥७०॥
ईश्वरजीवयोरैक्यमेवं साधनया भवेत् ॥
जन्ममरणसंसारात् एष जीवो निवर्तते ॥७१॥

सकलगुणनिधानं देवदेवाधिदेवं
भुवनपतिमहेशं नित्यमात्मस्वरूपम् ॥
प्रकृतिपुरुषदिव्यं त्र्यष्टतत्वेन भिन्नं
भजति वृजिनसिन्धोर्मानवः पारमेति ॥७२॥

इति श्रीगोपेश्वरमाहात्म्ये तत्वविवेचनं नामाष्टमोध्यायः ॥८॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अष्टम अध्यायको सारांश

भक्त चरित्र सुनेर खुशी भएका शौनकले पुन : उपनिषद्मा बर्णन गरेको शरीरका तत्व , जीव र ईश्वरको रहस्य जान्ने इच्छा प्रकट गर्नु भयो । सूत मुनिजी सुनाउनुहुन्छ । हे शौनक यस्तो ब्रह्मरहस्य पहिले साधनचतुष्टय नामको वेदान्त ज्ञान हुनुपर्छ । १ अनित्य नित्य वस्तुको ज्ञान हुनु ,२ इहलोक र परलोकको भोगेच्छामा वैराग्य हुनु, ३ शमाादिषट्कसम्पत्ति साधन गर्नु अर्थात् क. मनको निग्रह गर्नु =शम,ख. वाह्यइन्द्रिय दमन गर्नु =दम, ग. धर्मको अनुष्ठान गर्नु =उपरति, घ. गुरुवेदान्तबाक्यमा विश्वास गर्नु= श्रद्धा , ङ. शीत तापादि कष्ट सहनु= तितीक्षा , च. नित्य चित्त लगाई एकाग्रता गराउनु समाधान यी शमादिष्ट्क सम्पत्ति हुन् । ४ मोक्ष प्रप्त गर्ने क्ष्च्छागर्नु र साधना गर्नु ।यी चारको नाम साधन चतुष्ट्य हो । यसको ज्ञाता (जीव र ईश्वर तत्व जान्ने) अधिकारी हुन्छ । आत्मा दुई प्रकाको हुन्छ । जीवात्मा र परमात्मा । उपाधिले युक्त प्रतिशरीरमा रहने कर्मफल भोग गर्दै नाना योनिहरूमा घुम्ने असंख्य बनेर रहने जीवात्मा हो । उपाधि सम्बन्ध रहित् , सच्चिदानन्दरूप भएको सर्वव्यापक दृष्टि अनुसार नारायण, कृष्ण,र शिव परात्पर सर्वशक्तिमान् प्रभु ईश्वर हो । अभेद स्वरूप नारायणको उपासना गर्नु मोक्ष साधन गर्नु हो । पञ्च महाभूतहरूको पञ्चीकृत् विधिबाट निर्मित् सुख दु:ख भोग गर्न बनिएको षड्बिकारले युक्त भएको उपाधियुक्त स्थूल कलेवर शरीर हो । छ विकार भन्नाले १ जन्मनु २ रहनु ३ बढ्नु ४ अदल बदल हुनु ५ खिइनु र ६ नाश हुनुलाई बुझाउछ । स्थूल र सूक्ष्मका भेदले शरीर पनि दुई प्रकारको हुन्छ । पञ्चीकृतले पृथिवी–जल–तेज–वायु–आकाश संमिश्रण भएर डल्लो बने पछि स्थूल शरीर निर्माण हुन्छ । सूक्ष्म शरीरमा १७ कला हुन्छन् ।

पञ्चज्ञानेन्द्रिय -श्रोत्र–त्वग्–रसना–घ्राण–चक्षु)
पञ्चकर्मेन्द्रिय (वाक्–पाणि–पाद–पायु–भग)
पञ्चप्राण (प्राण–अपान–समान–उदान–व्यान)
मन र बुद्धि यी १७ कला हुन् ।

यी सबैका बिषय र देवता हुन्छन् । यसलाई कारण शरीर भन्दछन् । जाग्रत–स्वप्न–सुषुप्ति तीन अवस्था पनि हुन्छन् । विषयको इन्द्रियद्वारा प्रत्यक्ष अनुभव जाग्रत , निद्रामा अनुभव गर्नु प्रत्यक्ष इन्द्रियले अनुभव न गर्नु स्वप्न र केही थाहा पाइएन कति मजाले निधाइएछ ज्ञानै नहुनु सुषुप्ति हो ।

५ कोश हुन्छन् । १ अन्नले पुष्टि हुने अन्नमय , २ शुद्ध वातावरणले पुष्टि हुने प्राणमय, ३ मन ज्ञानेन्द्रिय द्वारा पुष्टि हुने मनोमय,४ बुद्धि ज्ञानेन्द्रिय द्वारा पुष्टिहुने विज्ञानमय , ५ केवल आनन्दमात्र हुने आनन्दमय । मायाले ब्रह्मको आश्रय गर्दछ । स्वभाव प्रकृति हो । यिनीहरुबाट महत्तत्वको

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

उत्पत्ति हुन्छ । अहंकारबाट आकाश एवं क्रमले आकाशबाट वायु वायुबाट तेज तेजबाट जल जलबाट पृथिवी उत्पन्न भएका हुन् । अहंकर्ता महत्तत्वविशिष्ट सत्वगुणमय शुद्धचित्ताधिपति चिन्तनीय भगवत्रूप वासुदेव हुनुहुन्छ । तामसगुण विशिष्टभूतेन्द्रिय हजार शिरवाला तेजस रूप संकर्षण हुनुहुन्छ । राजसांश बुद्धितत्वविशिष्ट निश्चय स्मृति निद्रायुक्त प्रकृष्ट प्रबोधन विस्तारकार कभगवत्रूप प्रद्युम्न हुनुहुन्छ । श्यामल वर्ण भएको जीवाधिपति भगवत् स्वरूप अनिरुद्ध हुनुहुन्छ । यी भगवान्का व्यूहरूप हुन् । सात्विक राजस तामस गुणका अंशद्वारा सूक्ष्म शरीरका गुणानुरूप अङ्ग बनेका छन् । पञ्चीकरण विधि भनेको पञ्चमहाभूतलाई एकरूपयाँमा सोह्र आनाको हिसाव अनुसार आधाआधा बनाएर आधा आधा भाग ५ ठाउमा राख्नुपर्छ । आधा भागलाई चार भाग लाउनु पर्छ ।

पृथिवी = १/२, जल १/८, तेज १/८, वायु १/८, आकास १/८ मिलेर पृथिवीआधारमा रहने प्राणी शरीर बन्दछ ।

जल = १/२, पृ. १/८, ते. १/८, वा. १/८, आ. १/८ मिलेर जल आधार मा रहने प्राणी शरीर बन्दछ ।

तेज = १/२, वा. १/८, आ. १/८, पृ. १/८, ज. १/८ मिलेर प्रकाशमा वाच्ने प्राणी शरीर बन्दछ ।

वायु = १/२ आ. १/८, पृ. १/८, ज. १/८, ते. १/८, मिलेर हावामा बाच्ने प्राणी बन्दछ ।

आकाश = १/२, पृ. १/८, ज. १/८, ते. १/८, वा. १/८ मिलेर आकाशमा लीन हुने र वाच्ने प्राणी शरीर बन्दछ ।

पञ्चीकरण विधि भनेको यही हो ।

त्यसकारण शरीर जन्मन्छ बढ्छ मर्छ । जीव मर्दैन । शरीरले गरेको कर्मफल भोगगर्दछ । जीव शरीरकृत कर्मफलको वासना बोकेर नाना जुनिका रूप धारण गर्दै संसारमा घुमिरहन्छ । जीवात्मा बाहेक शरीरका सबै तत्व मायाबाट बनेका हुनाले माया नै हुन् । जीवात्मा मायाले बाधिन्छ परमात्मा बाधिदैन । जीवात्मा परमात्मालाई पिठ्यु फर्काएर मायाका वस्तु शरीरकृत कर्मफल मायासंम्बन्धी वस्तु तर्फ जवसम्म आसक्त हुन्छ तब सम्म नाना योनिमा अनेकौ दुःख कष्ट शीत ताप जन्म मरण भोगदै संसारमा भड्किरहन्छ । शरीरकृत मायावी वस्तुलाई छाडेर परमात्मा ईश्वर नारायणमा अभिमुख हुन्छ । मेरा भगवान् म भगवान्को हूँ भन्ने धारणा लिएर अनवच्छिन्न परमप्रेमरूपा भक्ति द्वारा भजन गर्दछ । त्यसैले जन्म जन्मान्तर पापापहारी नारायण गोपेश्वर हरिलाई प्प्तगर्दछ जीवन सार्थक बनाउछ । संसार समुद्रबाट पार हुन्छ । इति गोपेश्वर माहात्म्य अन्तर्गत तत्वविवेचन नाम अष्टम अध्याय ॥८॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अथ नवमोऽध्यायः

शौनक उवाच

ग्रह-देवादिजन्येभ्यः कष्टेभ्यो निवृतिं नराः ॥
लभन्ते च कथं श्रेयो हेसूत ? तन्निवोधय ॥१॥
आयुरारोग्यसौभाग्यवृद्ध्यर्थं च नरैः सदा ॥
आराध्यः स शिवः केन विधिना तन्निवोधय ॥२॥
अवेदा वैदिका ये च स्त्रियः शूद्राश्च सर्वदा ॥
आराधनाय योग्यास्ते भवन्ति तन्निवोधय ॥३॥

सूत उवाच

सर्वेषामीश्वर आत्मा तस्यैव परितुष्टये ॥
श्रद्धया सर्वदा सेव्यः शिवो वा केशवो नरैः ॥४॥
पूर्वेऽहनि हविष्यान्नं भुक्त्वा शुद्धेन चेतसा ॥
शिवमाराधयिष्येऽहम् इति निश्चित्य संवसेत् ॥५॥
शौचस्नानादिकं कृत्वा शुद्धवस्त्राणि धारयेत्॥
पिवेत् गंगाजलं गव्यं भगवच्चरणामृतम् ॥६॥
भूशुद्धमासनं शुद्धं कृत्वा शुद्धासने स्थितः ॥
आराधयेत् शिवं नित्यं विधिक्रमानुसारतः ॥७॥
प्राणप्रतिष्ठां कुर्वीत स्वर्णफलादिमूर्तिषु ॥
प्रतिष्ठितासु शिद्धासु न कुर्यात् मन्दिरेष्वपि ॥८॥
पूवोक्त विधिना सर्वे वेदमन्त्रेण वैदिकाः ॥
शिवस्याराधनां कुर्युः सर्वजनहितैषिणः ॥९॥

श्रीगणेशस्तुतिः

गणानां प्रियाणां निधीनां गणेशः
प्रियेशो निधीशस्त्वमेव परेशः ॥
वसो[1] ? गर्भमाधेहि संराधयामि
क्षिपामि[2] श्रिये पूर्तये[3] कामनानाम् ॥१०॥
गायत्री[4] जगती त्रिष्टुवनुष्टुक्वृहतीककुव् ॥

---

१. ज्योतिस्वरूप देव सम्बोधन २. प्रेरणा गर्दछु ३. सेवा गर्दछु ४. यी वैदिक छन्दका नाम हुन्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

उष्णिक् पङ्क्तय एतास्त्वा संस्कुर्वन्तु वसो ? सदा ॥११॥
द्विपदास्त्रिपदा[५] याश्च चतुष्पदाश्च षट्पदाः ॥
विच्छन्दाः याः सछन्दाश्च सूचीभिस्त्वां पुनन्तु ताः ॥१२॥
प्रमाणपटवो धीराः सच्छन्दाः कर्मसाधकाः ॥
पूर्वेषां मार्गमालोक्याऽसृजन् यज्ञं रथी यथा ॥१३॥

यज्जाग्रतो दूरमुदैति दैवं
सुप्तस्य तद्वद् समुपैति चित्तम् ॥
सर्वेन्द्रियाणां मन एकमेव
ज्योतिर्गतिस्तन्मम शुद्धमस्तु ॥१४॥

अपस्विनो[६] येन मनीषिणो ये
कुर्वन्ति कर्माणि मखे विधानात् ॥
तस्मादपूर्वं मन आत्मरूप-
मन्तः स्थितं तन्मम शुद्धमस्तु ॥१५॥

मनो हि विज्ञानमुतः प्रजासु
यज्ज्योतिरन्तर्धृतिरात्मतत्वम् ॥
मनो विना कर्म न वै प्रजानां
पीयूषवत् तन्मम शुद्धमस्तु ॥१६॥

येन त्रिकालीयमिदं समग्रं
ज्ञातं स्थितं तेष्वपि शाश्वतेन ॥
येन मखः स्तन्यते सप्तहोता[७]
तादृङ्मनो मे शिवकल्पमस्तु ॥१७॥

यस्मिन्नृचः साम यजूंषि यस्मिन्
प्रतिष्ठिताः स्यन्दनमध्य आराः[८] ॥
चित्तं पटे तन्तुरिव प्रजानां
व्याप्तं मनो मे शिवकल्पमस्तु ॥१८॥

अश्वान् सुयन्तेव हि यन्मनुष्यान्
नेनीयते रश्मिभिरर्वतो[९] यद् ॥

५.द्विपदी आदि मन्त्रहरू ६. सियाद्वारा ७. कर्मगर्ने मनीषीको विशेषण ८. सात जनाले होम गरिने
९. रथको चक्का र नाभि सवैतिर सम्बन्ध भएमा धारीलो वस्तु

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हृदि स्थितं निःस्थविरं ज्जविष्ठ-
मेतन्मनो मे शिवकल्पमस्तु ॥१९॥

श्रीविष्णुस्तुतिः

नारायणस्यासंख्यानि पाद-नेत्र-शिरांसि च ॥
सन्ति स पुरुषो विश्वं व्याप्यातिष्ठद्दशाङ्गुलम् ॥२०॥
इदं भूतं भविष्यच्च स एव पुरुष परः ॥
कालत्रयस्य चेशानो[१३] यदन्ने[१४]नातिरोहति [१५]॥२१॥
एतावान् महिमास्यैव ततो ज्यायाँश्च पूरुषः ॥
विश्वानि पाद एकोंशस्त्रिपादस्यामृतं दिवि ॥२२॥
परुषः स त्रिपादूर्ध्व उत्कर्षेण प्रवर्तते ॥
पादैकोंशोऽस्य भूतानां बीजं स्वर्मोक्षकारणम् ॥२३॥
तस्माद्ब्रह्माण्डदेहोऽभूत् क्षेत्रज्ञो[१६] वसुधादयः ॥
देवतिर्यङमनुष्याणां शरीराण्यभुवन् ततः ॥२४॥
तस्मात्सर्वहुतो[१७] यज्ञात् दध्याज्यं संभृतं हविः ॥
वायव्यान् स पशून् वन्यान् चक्रे गवादिकानपि ॥२५॥
तस्माप्रज्वालिताद्यज्ञादृचः सामानि जज्ञिरे ॥
छन्दासि[१८] जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥२६॥
तस्मादश्वा गर्दभाश्च ये के जाताश्च तादृशाः॥
गावो ह जाज्ञिरे तस्मात् तस्माज्जाता अजादयः ॥२७॥
तं यज्ञं वर्हिषि[१९] प्रौक्षन्[२०] पुरुषं जातमग्रतः ॥
तेनायजन्त साध्याश्च ये देवा ऋषयश्च ते ॥२८॥
तस्मिन्निन्द्रादयो यज्ञे पुरुषमुदपादयन् ॥
मुखवाहूरूपादाः के कतिधा तं व्यकल्पयन् ॥२९॥
अस्यास्यं ब्राह्मणो वाहू राजन्य इति वर्णितः ॥

---

१०. घोडाहरूलाई ११. बूढो नहुने १२. छिटो दगुर्ने १३. सैवैयोक गर्न सक्ने स्वामी
१४. फलले १५. आफ्ना अवस्थालाई नाघेर दृश्यमान जागृत अवस्थालाई प्राप्त गर्दछ
१६. जीव १७. सबै चिज होम गरिने यज्ञको विशेषण १८. गायत्री आदि वैदिक शब्द
१९. आगोमा २०. पवित्र बनाएर

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तदस्योरू च ये वैश्याः शूद्रः पदभ्यामजायत ॥३०॥
चन्द्रमा मनसो जातो दृग्भ्यां भानुरजायत ॥
श्रोत्रात्प्राणाश्च वायुश्च मुखादग्निरजायत ॥३१॥
हविषा पुरुषाख्येन देवा यज्ञमतन्वत ॥
वसन्तर्तुरभूदाज्यं ग्रीष्म इध्मः शरद्धविः ॥३२॥
परिधयोऽस्य[२१] सप्तासन् त्रिसप्तसमि[२२]धस्तथा ॥
देवा यज्ञं वितन्वाना[२३] अम्बध्नन् पुरुषं पशुम् ॥३३॥

यज्ञेन यज्ञं व्यदधु[२४] र्हि देव।
धर्माणि तानि प्रथमानि चासन् ॥
ते पुण्यवन्तः कृतदेहशुद्धा
नारायणाख्यं पुरुषं लभन्ते ॥३४॥

भूतादिपञ्चाद्रस एव पुष्टो
मित्रस्य योऽसौ समवर्तताग्रे
रसस्य रूपं विदधत्[२५] स नित्यं
देवत्वमाजानमुदेति[२६] सूर्यः ॥३५॥

वेदाहमेतं पुरुषं महान्तम्
आदित्यवर्णं तमसः परस्तात् ॥
ज्ञात्वा तमाद्यं समुपैति चान्यो
न विद्यते सत्पथ आश्रयाय ॥३६॥

स एव गर्भेऽन्तरजायमानो
मायाप्रपञ्चेन विजायते च ॥
जानन्ति धीराः परतत्वमेतत्
विश्वानि तस्थुर्भुवनानि तस्मिन् ॥३७॥

योऽर्थाय द्योतते नित्यं यो देवानां पुरोहितः ॥
योऽग्रे जातो हि देवेभ्यस्तस्मै सूर्याय वै नमः ॥३८॥
जनयन्तो रुचं ब्राह्ममादित्यमिति चाब्रुवन् ॥
यस्त्वैवं ब्राह्मणो विद्यात्तस्य देवा वशे सदा ॥३९॥

२१.पृथीवी जल तेज वायु, आकाश मन र बुद्धिको परिवेश २२. पञ्चतन्मात्रा, पञ्चज्ञानेद्रिय, पञ्चमहाभूत पञ्च मनरूपी समिधा दाउरा २३. फैलाउँदा छँदा २४.सम्पन्न गर२५. गर्दै २६. मुख्य

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लक्ष्मीश्च ते श्रीश्च तवैव पत्न्यौ
रात्रिन्दिवे द्वे च तवैव पार्श्वे ॥
ऋक्षाणि रूपं मुखमश्विनौ च
हेसूर्य सम्पूरय मे शुभेच्छाः ॥४०॥

इन्द्रस्तुतिः, बृहस्पतिस्तुतिश्च

आशुः शिशानो[२७] वृषभो[२८] नभीमो[२९]
घनाघनः[३०] क्षोभकरो नराणाम् ॥
संग्रामकर्ता पटुरेकवीर[३१]
इन्द्राऽ जयत् ताः सहसारिसेनाः ॥४१॥

अतन्द्रितो[३२] धीरगुणी महेन्द्रः
सङ्क्रन्दनो युद्धविशारदोऽस्ति ॥
तेनेषुहस्तेन सहायकेन
हे युद्धवीराः ? विजयं लभध्वम् ॥४२॥

स योद्धृभिः संसृजति स्वयोद्धॄन्
तैः सैन्यगुल्मैर्जयति स्वशत्रून् ॥
इदृग्गुणो वाहुवली सुधापा
अधिज्यधन्वा ऽवतु नो महेन्द्रः ॥४३॥

वागीश ? सर्वत्र रथेन गच्छन्
रक्षांसि शत्रूनपवाधमानः ॥
सेनाः प्रभञ्जन् प्रमृणो जयन् स-
न्नस्मद्रथानां भव रक्षकस्त्वम् ॥४४॥

इन्द्र ? त्वमेव प्रवलो महीयान्
ज्ञाता ऽसि वीरः स्थवीर[३३] सहस्वान्[३४] ॥
ऐश्वर्यवान् ज्ञानवतां वरिष्ठ
आतिष्ठ जैत्रं[३५] कृतवीरसेनः ॥४५॥

युद्धं जयन्तं खलु वज्रवाहुं

---

२७. धारिलो लाग्ने बनाउने २८.गोरू २९. अभयङ्कर ३०. अत्यन्त घातक ३१. अद्वितीयवीर ३२. सधै सावधान रहने ३३. वूढोहुनाले सवैले मान गरिने ३४. वलवान् ३५.विजय दिलाउने रथ

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वृष्टिप्रदं गोविदमिन्द्रमार्यम् ॥
समानजाता ? अनुवीरयध्वम्
देवाः ? सवीरा? अनुसंरभध्वम् ॥४६॥
स्वतेजसा दैत्यकुलानि मेघान्
विलोडयन् क्रोधवशोऽच्युतः सन्
अविद्यमानप्रतियोध इन्द्रः
संग्रमजिद्रक्षतु नोऽभिसेनाः॥४७॥
वृहस्पतीन्द्रौ भवतां पती द्वौ
नारायणो दक्षिणतः समेतु ।
सोमश्च वायुश्च पुरः समेताम्
युज्जित्वराणा[३६] सुरवाहिनीनाम् ॥४८॥
वृषोदकेशानिलभास्कराणां
वलं समग्रं जयतामुर्दस्थात्[३७] ।
महामहिम्नां भुवनच्यवाना-
मभुज्जितं चेति रवो महीयान् ॥४९॥
अस्त्राणि संज्वालय देवराज ?
विधेहि ते शीघ्रगतिं हयानाम् ॥
मनांसि हर्षाणि च मामकाना-
मुद्यन्तु[३८] घोषा जयतां रथानाम् ॥५०॥
इन्द्रो हि नो रक्षतु नः कलम्वा[३९]
जयन्तु शत्रुध्वजसंयुतेषु ॥
अस्मत्प्रवीराः सफलाः परेभ्यो
रक्षन्तु नो देववरा हवेषु[४०] ॥५१॥
लुठन्त्यभिप्रेहि परेहि चित्तं
द्विषां शरीराणि निगृह्यमाणे ? ॥
अप्वे ?[४१] दहैषां हृदयानि शोकै

३६. युद्धजित्ने ३७.उठ्यो जित्यो भन्ने शब्द फैलियो । ३८. उठ्नु ३९. वाणहरू ४०.यद्धको लागि वोलाएमा ४१. शत्रुको सेनालाई मोह गराउने इन्द्रसम्बन्धी मोहिनी रूपा देवी सम्बोधन

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गाढांन्धकारेण पराः सचन्ताम्[४२] ५२॥

प्रक्षिप्ता रिपुसैन्येषु शरव्ये[४३] ? ब्रह्मशंसिते[४४] ?
रिपुदेहं प्रपद्यस्व रिपूनुन्मूलनं कुरु ॥५३॥
यात जयत योद्धार ? इन्द्रो वः शर्म यच्छतु ॥
अप्रधृष्या यथा यूयमुग्रा वः सन्तु बाहवः ॥५४॥

सेना परेषामभिमन्यमाना
हे वायवो ऽस्मान् प्रभयाभ्युपैति ॥
इमे न जानीयुरपब्रतेन
सेना अमूर्व्याप्नुत तामसेन ॥५५॥

संपतन्तीषवो यत्र कुमारा विशिखा इव ॥
गुरुरदितिरिन्द्रश्च यच्छन्तु शर्म सर्वदा ॥५६॥

मर्माणि रक्षामि हि वर्मणा ते
सोमो ऽमृतेनैव करोतु यज्वन् ॥
उरोर्वरीयो वरुणस्तथा त्वां
हृष्यन्तु जैत्रं विबुधाः प्रसन्नाः ॥५७॥

सूर्यस्तवः

पिवतु चान्द्रमसं मधुरं रवि
र्भवतु तेजयुतो जनपोषकः ॥
मखपते र्विदधच्चिरजीवनं
भ्रमति वातयुतो गगने सदा ॥५८॥

प्रसिद्धं सूर्यदेवं हि सर्वदा जातवेदसम् ॥
विश्वस्य दर्शनायैव रश्मय उद्वहन्ति[४९] तम् ॥५९॥
यजमानो दर्शनेन मुक्तिमाप्नोति पावक ? ॥
खगं संपाद्य चात्मानमस्मान् वरुण[५०] ? पस्यसि ॥ ६०॥

आयातमश्विनौ देवौ रथेन सूर्यवर्चसा ॥
अध्वर्युर्हविषा[५१] यज्ञं सफलं कुरुतां मम ॥६१॥

४२.जाउन, भागुन ४९.सम्पूणवस्तुको ज्ञान गराउने ५०.सूर्य ५१.यज्ञसम्पन्न गराउने नेताद्वय (अधिनी कुमारको विषेष्ण)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नमामि हे शक ? पेराणपूर्वज[५२]
पुरातनैश्चापि[५३] सदा सुपूजितम् ॥
मखेषु कार्येषु वलं प्रदोहसे
विदेहि मां श्रेष्ठवलं विनिर्भयम् ॥६२॥

मेधाविनो वालमिव स्तुवन्ति
चन्द्रं मनोज्ञं वचनै सुवृष्ट्यै ॥
जलार्कसङ्गे[५४] धृतपृश्निगर्भ[५५]
पंचोदयत्येष रविः सेधांशुम् ॥६३ ॥

मित्रस्य वह्नेर्वरुणस्य चक्षुः
देवाश्रयं पूज्यमिदं विचित्रम् ॥
आच्छाद्य विश्वं किरणैः स सूर्य
उदेति वै स्थावरजङ्गमात्मा ॥ ६४॥

सूर्यो मखे नः किरणैः समेतु
कल्याणकारी च भवेत्तनूनान् ॥
आगत्य देवा भुवि तृप्तिमन्तः
सर्वं जगत् तृप्तियुतं विधेयुः ॥६५॥

कुत्रचिदभ्युदेषि त्वं जगत्सर्वं वशे भवेत् ॥
ईश्वरो न द्वितीयोऽस्ति त्वमेवैको हि वृत्रहन् ॥६६॥
ज्योतिष्कृदसि हे सूर्य विश्वं दीपयसि स्वयम् ॥
विश्वस्य दर्शनीयश्च सदा तरसि सत्पथम् ॥६७॥
संसारमध्ये विततं प्रकाशं
रात्र्यागमे तं हरते दिनेशः ॥
निमज्जयन् यद् भुवनं तमोऽन्धे
तत्सूर्यदेवत्वमिदं महित्वम् ॥६८॥

विलोकते मित्रदृशा स साधून्
सूर्यो द्युलोके वरुणेन दुष्टान् ॥

५२.पुराणमा वर्णन गरिएका पुरुषहरू भन्दा पहिले जन्मिएका
५३.भृगु आदि ऋषिद्वारा ५४.सूर्यताप र जलमिलेमा ५५. समुद्रदेखि मिलेर अल्पजलमार्गमा लिन

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

द्वैतोऽथवाऽद्वैतगुणोऽगुणश्च
ब्रह्मैव विज्ञानघनप्रमोदः ॥६९॥

ऋतमैस्त्वमेव[५६] भास्करो
महिमा तवैव गीयते ॥
असि सूर्य ? दानशीलवान्
विवुधैः सदैव पूज्यसे ॥७०॥

यशसा महान् त्वमेव हि
विवुधेषु पूज्य ? ईश्वर ? ॥
सुखदश्च तेजसान्वितः
प्रमुखो मखेषु सर्वदा ॥७१॥

रविमाश्रयन्त आतपा
विभजन्ति ते बसूनि च ॥
जनिते सुते सतेजसा
स्ववसूनि धारयाम हि ॥७२॥

सूर्यप्रभाः किल्विषदोषतो मा-
मुन्मुच्य कुर्वन्तु सदाऽनवद्यम् ॥
माता समुद्रः पृथिवी नदी द्यौः
जलेशमित्रावुत मां न हन्युः ॥७३॥

सुवर्णरूपेण रथेन साध-
मायाति सूर्यो भुवनानि पश्यन् ॥
आवर्तमानो निशयोऽमरान् नृन्
स्थानेषु हि स्वेषु निवेशयंश्च ॥७४॥

शिवस्तुतिः

रुद्र ? क्रोधाय वाणाय हस्ताभ्यां च नमोनमः ।
नित्यं क्रोधेषु हस्तास्ते प्रसरन्त्वरिष्वेव मे ॥७५॥
अघोरा या तनूरस्ति शंकर ? पापनाशिनी ॥
सा शन्तमा तनूस्तेऽद्य सुखं तनोतु नः सदा ॥७६॥

५६.कल्याणकार महेश्वर

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हे गिरिशन्त ? यं वाणं क्षेप्तुं धारयसि भुजे ॥
सुखदं कुरु तं शम्भो मा हिंसीः पुरुषं जगत् ॥७७॥
शिव ? शुभेन वाक्येन त्वां प्रप्तुं प्रार्थयामहे ॥
नीरोगा नो जनाः सन्तु भूयात् सुखमयं जगत् ॥७८॥
हे सुरवैद्य त्वामभिवन्दे
देवसमाजे त्वं प्रथमोऽसि ॥
वाचनशक्त्या व्यालसमूहान्
जम्भय सर्वान् राक्षसवर्गान् ॥७९॥
रोहितरागः पिङ्गलवर्णः
भास्कररूपो मङ्गलमूर्तिः ॥
यस्य करेषु सन्ति रुषो याः
ता विनियन्तुं संभजनीयः ॥८०॥
अभ्युदये यो लोहितवर्णो
नीलगलोऽसावस्तमयेऽपि
गोपसमूहैर्लोकितरुद्रो
मण्डलवर्ती शं तनुतां नः ॥८१॥
नमोस्तु नीलकण्ठाय रुद्राय वृष्टिकारिणे ॥
यस्यानुयायिनः सत्वाः सन्ति तेभ्यो नमो नमः ॥८२॥
षड्विधैश्वर्यसम्पन्न ? शिव ? त्वां प्रार्थयाम्यहम् ॥
मुञ्चाधिज्यं धनुः क्षिप्रं करस्थान् तानिषूनपि ॥८३॥
धनुः स्यात् शिञ्जिनीहीनं विशल्य इषुधिरपि ॥
शराः तूणाश्च नश्यन्तु न्यस्तशस्त्रः शिवो स्तु नः ॥८४॥
सायुधं ते धनुर्हस्ते वर्षुक ? शोभते सदा ॥
पालय सर्वतः शम्भो ? नीरोगेणायुधेन नः ॥८५॥
धनुः सम्बन्धि यच्शस्त्रं परिवृणक्तु सर्वतः ॥
अस्मत्त इषुधीन् दूरे शिवः संस्थाप्य शाम्यतु ॥८६॥
अवतार्य धनुस्त्वं हे सहस्राक्ष ? शतेषुधे[५७] ?॥

---

५७. शथ्या वाण भद्ने ठोको भिक्ने सम्बोधन

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शल्यमुखानि निःशीर्य शिवो नः सुमना भव ॥८७॥
चापाद् भिन्नाय वाणाय शत्रुधर्षणशालिने ॥
शंकर?तव वाहुभ्यां धनुषे च नमो नमः ॥८८॥
मावधीरर्भकं पूजनीयं जनं
मावधीर्नो युवानं तथा गर्भगम् ॥
मावधीर्मातरं जन्मदं स्वं गुरुं
मावधीर्नः प्रियां श्रीमतीं शंकर ? ॥८९॥
सुतेषु पौत्रेषु च गोषु वस्तुषु
मदाश्रितेष्वेषु जनेषु कर्मसु ॥
अनन्यभक्तोऽस्म्यहमाह्वये विभो ?
महेश ? रक्षां कुरु तान् सदा प्रभो ॥९०॥
नमो नमः स्वर्णसुचारुवाहवे
नमोऽस्तु सेनापतये पिनाकिने ॥
नमः पशूनां पतये त्विषीमते[५८]
नमो हरित्केशयुजे सुपुष्टये ॥९१॥
नमोऽस्तु संसारविमोचनाय
नमो जगत्पे भव रोगहन्त्रे ॥
नमोऽन्नदेवाय वृषध्वजाय
नमस्तनूसारथिरक्षकाय ॥९२॥
नमोऽस्तु धूम्राय नमो भुवन्तये[५९]
नमो वनानां पतये सुशिल्पिने[६०] ॥
नमो धनेशाय नमः सुमन्त्रिणे
नमोः वलेशाय सुशब्दकारिणे ॥९३॥
नमोऽस्तु मौर्वीयुतचापधारिणे
नमोऽस्तु चौराय नमो निषङ्गिणे ॥
नमोऽस्त्वरण्येऽधिकवासशालिने
नमोऽरिहन्त्रे सुरसैन्यपायिने ॥९४॥

---

५८. प्रकाशले युक्त ५९.पृथिवी फैलाउने ६०. गृहादि निर्माण गर्नु सिपालु

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नमोऽस्तु धूर्ताय निषङ्गधारिणे
नमोऽस्तु दस्यूनधिहन्तुमुद्यते ॥
नमोऽस्तु खड्गेन सह प्रधावते
नमोऽस्तु रात्रिंश्चरते च शम्भवे ॥९५॥
नमोः शिरोवेष्टनसौम्यशोभिने
नमो हिमाच्छन्नगिरीन्द्रचारिणे ॥
नमो निषङ्गायुधचापधारिणे
चराचराणां पतये नमोनमः ॥९६॥
नमोऽस्तु वाणान् रिपुषु क्षिपद्भ्यो ॥
नमोऽस्तु जाग्रद्भ्य उतः स्वपद्भ्यः ॥
नमोऽस्तु तिष्ठद्भ्य उतश्चरद्भ्यो
नमोऽस्तु चिच्शक्तिसमन्वितेभ्यः ॥९७॥
नमः सभारूपशिवाय शम्भवे
सभापतीनां च गुणैकसिन्धवे
नमोऽश्वरूपाय च सैन्यकेतवे
नमो जगत्तारणमुख्यसेतवे ॥९८॥
नमो गणेभ्यश्च गणाधिपेभ्यो
नमः सुधीभ्यश्च सुधीपतिभ्यः
नमो विरूपादिहयाधिपेभ्यः
समस्तवर्णाधिप ? ते नमो नमः ॥९९॥
नमश्चमूभ्यश्च चमूपतिभ्यो
नमो रथिभ्यो रथवर्जितेभ्यः ॥
नमोऽर्भकेभ्यश्च नमो महद्भ्यो
नमोऽस्तु सारथ्यकलाधिपेभ्यः ॥१००॥
कुलाल-कर्मार-शिताङ्गकार
व्याध–श्व-[६१]पुञ्जिष्ठजनागमानाम्६१ ॥
समूहरूपाय सदाशिवाय

६१. पुलक सादि जतिहरूको

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पुनश्च भूयोऽपि नमो नमस्ते ॥१०१॥
नमोऽस्तु शूनां निवहाधिपाय[६२]
श्रीनीलकण्ठाय च पापहन्त्रे ॥
नमोऽस्तु रुद्राय नमो भवाय
नमो पशूनां पतये शिवाय ॥१०२॥
सहस्रनेत्राय जटाधराय
कलम्वहस्ताय धनुर्धराय ॥
जीमूतरूपेण जलेन सेक्त्रे
नमो गिरीशाय हरिप्रियाय ॥१०३॥
नमोऽस्त्वनन्ताय च वामनाय
वर्षीयसे वृद्धतराय वै नमः ॥
शीघ्राय शीघ्राधिभुवेऽजिराय
गर्तस्वनस्थाय नदीस्थिताय ॥
तरङ्गवासाय जलाधिपाय
द्वीपे निवासाय नमः शिवाय ॥१०४॥
ज्येठाय देवाय च पूर्वजाय
नमो कनिष्ठाय च मध्यमाय ॥
नमोऽपगल्भाय[६३] च पश्चिमाय
वृक्षाधिमूलाय नमः शिवाय ॥१०५॥
नमोऽस्तु गन्धर्वपुरीस्थिताय
माङ्गल्यसूत्राय नमोऽन्तकाय ॥
वेदान्तरूपाय च वैदिकाय
क्षेमाय धान्याय नमः शिवाय ॥१०६॥
तृणाधिवासाय वनाधिपाय
शब्दस्वरूपाय समाधये च ॥
शत्रूञ्जयायाररथाय तस्मै
युद्धेषु धीराय नमः शिवाय ॥१०७॥

---

६२. कुकुर र मालिकका स्वामी ६३.गर्भवास नगन

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चन्द्राहिभ्यां भूषितशेखराय
कार्पासलौहात्मकवर्मिणे च
वरूथिने[६४] लोकविदे श्रुताय
भेरीनिनादाय नमः शिवाय ॥१०८॥

नमः प्रगल्भाय विचक्षणाय
निषङ्गिणे तीक्ष्णशरान्विताय ॥
अमोघशैवाख्यधनुर्धराय
त्रिशूलहस्ताय नमः शिवाय ॥१०९॥

कुमार्गरूपाय सृतिस्थिताय
कूपात्मने गर्तनिवासकर्त्रे ॥
जलाधिवासाय नदीजलाय
स्वान्तस्थदेवाय नमः शिवाय ॥११०॥

कूपाधिदेवाय नभो निभाय
प्रकाशरूपाय वलाहकाय
विद्युत्स्वरूपाय च वर्षुकाय
वृष्टिप्रवाधाय नमः शिवाय ॥१११॥

समीरवेगाय लयङ्कराय
वास्तव्यरूपाय च वास्तुपाय ॥
व्यथाविनाशाय शिवायुताय
दारिद्र्यनाशाय नमः शिवाय ॥११२॥

समस्तजीवेषु सुखप्रदाय
समीपदूरस्थरिपुक्षयाय ॥
उग्राय भीमाय सुरद्रुमाय
संसारताराय नमः शिवाय ॥११३॥

नमोऽस्तु संसारसुखप्रदाय
कल्याणरूपाय च शंकराय ॥
आनन्दरूपाय मयस्कराय
विकारशून्याय नमः शिवाय ॥११४॥

६४. रथमा राखिने फलामपर्दा भित्र रहने

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अवारपारीणजगत्स्थिताय
भक्त्या हि पापार्णवतारणाय ॥
तीर्थे निवासाय तटे स्थिताय
कुशाङ्कुरस्थाय नमः शिवाय ॥११५॥

प्रवाहरूपाय सुसैकताय
तर्के तुषाराय जलात्मकाय ॥
जटाकिरीटाय महापथाय
कान्तर्निवासाय नमः शिवाय ॥११६॥

गोष्ठाधिदेवाय वृषाधिपाय
शय्याधिवासाय गृहस्थिताय ॥
जीवस्वरूपाय जलभ्रमाय
गभीरतोयाय नमः शिवाय ॥११७॥

शुष्कार्द्रधूल्यन्तरवासकर्त्र
उच्चार्यमाणाय तृणान्तराय ॥
अगम्यदेशाय च वाडवाय
कल्पान्तकाराय नमः शिवाय ॥११८॥

उद्योगि-भक्तजनमोदकराय पाप-
नाशाय हर्षकर-वाण-धनुष्कराय ॥
पर्णाय पत्रपतितस्थितिभूशयाय
दुर्हृद्विनाशकुशलाय नमः शिवाय ॥११९क॥

सामगानम्

देवानां हृदयेभ्यो
भास्वानग्निमरुद्भ्यः ॥
वृष्टेर्लोककरेभ्यो
रुद्रेभ्योऽस्तु नमो मे ॥११९ख॥

शिव ? नीलकण्ठ ? सोमपाः ?
हर पापिनामघं वहु ॥
अभयं प्रजासु गोषु च
कुरु निर्गदान् सदा सुतान् ॥१२०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

महेश? याभिर्मतिभि र्वयं सदा
कपर्दिन[६५] त्वामभिवादयामहे ॥
अनातुरान् ग्रामजनान् निरामयान्
विधत्स्व मे तान् कुलजान् पशूनपि, ॥१२१॥
रुद्र? शान्ततमा तेऽस्ति तनू व्र्याधिनिवर्तिका ॥
अस्मान् सम्यग्जीवनाय तया सुखय सर्वदा ॥१२२॥
शिवायुधं दुष्टमतीन् विहन्यात्
श्रद्धान्वितान्नः परितो वृणक्तु ॥
हेवृष्टिकारिन् मृड[६६] पुत्रपौत्रान्
भक्ताय शस्त्रं शिथिलं कुरुष्व ॥१२३॥
अत्यन्तकामेच्छुक ? शर्मकारिन्
पिनाकधारिन् सुमनाः शिवेहि[६७] ॥
संस्थाप्य शूलं परमे सुवृक्षे
समाचरत्वं मृगचर्मधारिन् ॥१२४॥
घातोपद्रवनाशिन् ? हे शुद्धरूप ? महेश्वर ? ॥
तुभ्यं नमोऽस्तुं ,तेऽस्त्राणि घ्नन्त्वस्मद्दुर्हृदो जनान् ॥१२५॥
भगवन् हस्तयोस्तेऽद्य सन्ति शस्त्राण्यनेकशः॥
मुखानि कुरु तेषां हि विपरीतेषु सर्वदा ॥१२६॥
असंख्याः कष्टदा रुद्रा अधिभूम्यांवसन्ति ये
तेषां प्रक्षिप्य धन्वानि दूरं नो रक्ष शंकर ? ॥१२७॥
अन्तरिक्षे ऽपि ये रुद्राःसन्त्यस्मिंश्च महार्णवे ।
तेषां प्रक्षिप्य धन्वानि दूरं नो रक्ष शंकर ? ॥१२८॥
द्युलोकमाश्रिता रुद्रा शुभ्रनीलगलाश्च ये ॥
तेषां प्रक्षिप्य धन्वानि दूरं नो रक्ष शंकर ?॥१२९॥
शुभ्रनीलगला रुद्राःपातालेषुचरन्ति ये ।
तेषां प्रक्षिप्य धन्वानि दूरं नो रक्ष शंकर ? ॥१३०॥

६५. जटाको जुरो बनाउने ६६. सुख गराउनुहोस ६७. हे शिव आउनुहोस

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वृक्षेषु शष्परूपा ये नीलग्रीवा विलोहिताः ।
तेषां प्रक्षिप्य धन्वानि दूरं नो रक्ष शंकर ? १३१॥
मुण्डिता ये जटावन्तः शरीरान्तरवर्तिनः।
तेषां प्रक्षिप्य धन्वानि दूरं नो रक्ष शंकर ? १३२॥
अन्नभृतः सृतीशा[६८] ये आजीवनान्यदुःखदा ॥
तेषां प्रक्षिप्य धन्वानि दूरं नो रक्ष शंकर ? १३३॥
ये हि चरन्ति तीर्थेषु रुद्राः शस्त्रास्त्रसंयुताः ॥
तेषां प्रक्षिप्य धन्वानि दूरं नो रक्ष शंकर ? १३४॥
पात्रान्नोदकदुग्धस्था रोगानुत्पादयन्ति ये ॥
तेषां प्रक्षिप्य धन्वानि दूरं नो रक्ष शंकर ? १३५॥
एतावन्तश्च भूयांसो दिशो रुद्रा वितस्थिरे ॥
तेषां प्रक्षिप्य धन्वानि दूरं नो रक्ष शंकर ?१३६॥

ये· रुद्रा दिवि सन्ति मङ्गलजला वृष्टिं विना दुःखदा
वृष्ट्या लोकसुखावहा अविरतं येषां हि वृष्टीषवः ॥
तेभ्यो नोऽञ्जलिना नमोस्तु परितः प्राच्यादिसर्वा दिशो
येऽस्मान घ्नन्ति वयं रिपूनिति च तान् सर्वान्निराकुर्महे ॥१३७॥

ये रुद्रा गगने भ्रमन्ति हि महावातेन दुःखप्रदाः
सम्यक् सञ्चलनेन शान्तिसुखदा येषां हि वातेषवः ॥
तेभ्यो नो ऽञ्जलिना नमो ऽस्तु परितः प्राच्यादिसर्वा दिशो ॥
येऽस्मान् घ्नन्ति वयं रिपूनिति च तान् सर्वान्निराकुर्महे ॥१३८॥

ये रुद्रा भुवि सन्ति जीवफलदाः कायेषु पुष्टिप्रदा :
रोगााणमपि वर्धका विकृतिदा येषां हि चान्नेषवः
तेभ्यो नो ऽञ्जलिना नमो ऽस्तु परितः प्राच्यादिसर्वा दिशो ।
ये ऽस्मान् घ्नन्ति वयं रिपूनिति च तान् सर्वान्निराकुर्महे ॥१३९॥

सुहुतं रुद्रभागस्ते जुषस्वाऽम्विकया सह ॥
पशुराखुस्तवैवांशः प्रसन्नो भव शंकर ? ॥१४०॥
रुद्रं तं त्र्यम्वकं देवं भोजयामो हुतं हविः ॥
रुद्रः कुर्यात् वरिष्ठान् नो ज्ञातिर्षु शान्तिसंयुतान् ॥१४१॥

६८. वाटामा मालिक बनेर दुखदिने

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रुद्रः क्रोधाय वाणाय हस्ताभ्यां च नमो नमः ॥
नित्यं क्रोधेषु हस्तास्त अरिषु प्रसरन्तु मे ॥१४२॥
अघोरा या तनूरस्ति शंकर ? पापनाशिनी ॥
सा शन्तमा तनूस्तेऽद्य सुखं तनोतु नः सदा ॥१४३॥

जजान[६९] भूतानि हि विश्वकर्मा
जीवा न जानन्ति परं तमीशम् ॥
कुतार्किका वाऽसुतृपश्च[७०] सर्वे
परावराभोगपराश्चरन्ति ॥१४४॥

यो विश्वकर्मा ह्यजनिष्ट पूर्वं
जातश्च गन्धर्व उत द्वितीयः ॥
पिता तृतीयो जनितौषधीनां
त्राता जलानां विदधाति गर्भम्॥१४५॥

अत्यन्तकामेच्छुक ? शर्मकारिन्
पिनाकधारिन् सुमनाः शिवेहि ॥
संस्थाप्य शूलं परमे सुवृक्षे
समाचर त्वं मृगचर्मधारिन् ॥१४६॥

घातोपद्रवनाशिन् हे शुद्धरूप ? महेश्वर ॥
तुभ्यं नमोऽस्तु तेऽस्त्राणि घ्नन्त्वस्मद्दुहृदो जनान् ॥१४७॥
भगवन् हस्तयोस्त ऽद्य सन्ति शस्त्राण्यनेकशः ॥
मुखानि कुरु तेषां हि विपरीतेषु सर्वदा ॥१४८॥
असंख्या दुःखदा रुद्रा अधिभूम्यां वसन्ति ये ॥
तेषां प्रक्षिप्य धन्वानि दूरं नो रक्ष शंकर ? ॥१४९॥
ब्रतस्थास्ते वयं सोम ? तनूषु विभ्रतो मनः ॥
सेवामहे प्रजावन्तं प्रसन्नो भव शंकर ? ॥१५०॥
सुहुतं रुद्रभागस्ते जुषस्वा म्बिकया सह ॥
पशुराखुस्तवैवांशः प्रशन्नो भव शंकर ? ॥१५१॥
रुद्रं तं त्र्यम्वकं देवं भोजयामो हुतं हविः ॥
रुद्रः कुर्याद् वरिष्ठान् नो ज्ञातिषु शान्तिसंयुतान् ॥१५२॥

६९. पैदा गराउनु भयो ७०. प्राण तृप्ति गर्न चाहने

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भेषजमसि हे रुद्र प्राणिसुखाय भेषजम् ॥
दत्वा मेषाश्वगोनृभ्यः प्रसन्नो भव शंकर ॥१५३॥
यजामहे त्रिनेत्रं त्वां सुगन्धिं पुष्टिवर्धनम् ॥
वृन्तादिव फलं शम्भो ? मृत्योर्मुक्षीय[७१] माऽमृतात् ॥
यजामहे त्रिनेत्रं त्वां सुगन्धिं पतिवेदनम् ॥
स्याम मुक्ताः पितुर्गोत्रात् न तु भर्तुः कदाचन ॥१५४॥
एतत्ते शम्बलं रुद्र ? तेनेहि पर्वतं प्रति ॥
गुप्तधन्वा कृत्तिवासा अहिंसन्नः शिवोभव ॥१५५॥
त्र्यायुषं जमदग्नेर्यत् त्र्यायुषं कश्यपस्य च ॥
देवानां त्र्यायुषं यत् तत् त्र्यायुषं नो स्तु सर्वदा ॥१५६॥
क्षुररूप ? शिवो नाम पिता ते वज्रमस्ति हि ॥
अतस्तुभ्यं नमो मेऽस्तु मा हिंसीः मां कदाचन ॥१५७॥
निवर्तयाम्यहं मूर्ध्नि सन्तानायायुषे तथा ॥
अन्नाय धनसंवृद्ध्यै सुवीर्याय सुकीर्तये ॥१५७॥
इति श्रीगोपेश्वरमाहात्म्ये देवाराधनो नाम नवमो ऽध्याय : ॥९॥

---

७१. मृत्युबाट मुत्ति गराउनु होस अमृत (अमरत) बाट मुक्ति नगराउनुहोस्

नवम अध्यायको सारांश

ग्रहदेवताहरूबाट हुने कष्ट निवृत्तिका लागि र आयु आरोग्य सौभाग्य वृद्धिका लागि वेद ज्ञान भए न भएका स्त्री शूद्र जो कोही सब आराधना गर्न योग्य हुने कल्याण वचन बुझाउन शौनकले आग्रह गरे पछि सूत मुनि बताउनु हुन्छ । पूर्व दिनमा हबिष्यान्न खानुपर्छ म शिवको आराधना गर्नेछु भनी आराधना गर्ने दिन शौच स्नानादि कर्म गरेर शुद्ध धोएका बस्त्र लगाएर जलले आसन शुद्ध गरी आसनमा बस्नु पर्दछ । प्राणप्रतिष्ठित प्रतिमामा वा मन्दिरमा प्राण प्रतिष्ठा गर्नु पर्दैन । अन्यत्र प्रतिष्ठा विधि गरेर पाद्य आचमन् आदिद्वारा पूजा गर्नु पर्दछ । त्यस पछि यसै माहात्म्यमा उल्लिखित् वेदमा जुन छन्दमा छ त्यही छन्द लौकिक संस्कृत भाषामा प्रयोग गरी बनाएको यो सरल वेद सबैले पढ्न लायक छ । उच्चारण गरेर पढ्नु पर्दछ । त्यहाँ पञ्च देवताको स्तुति छ । प्रथम गणेशको स्तुति छ । गंणका मालिक गणेश, प्रियजनका मालिक प्रेमी निधिका मालिक निधिपति परमेश तपाइँ नै हुनुहुन्छ । तपाईं वसुरूप हुनुहुन्छ । हे वासुदेव ! दिव्यज्योति धारण गर्ने

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शक्ति ममा स्थापना गरिदिनु होस् । म सेवा गर्दछु । गायत्री जगती निष्टुप अनुष्टुप आदि छन्द सहित वा छन्द रहित मन्त्रहरूले तपाईँलाई पवित्र बनाउन् । जाग्रत अर्धविहोस् सुषुप्त अवस्थामा हिड्दा वोल्दा खांदा वस्ता यज्ञ यागादि अनुष्ठान गर्दा वाहनमा रथमा जति खेर जहाँ पनि मन पवित्र भइरहोस् । यसरी गणेशको वन्दना गरेपछि विष्णुको वन्दना गरिन्छ । भगवान नारायण असंख्य पाउ आँखा शिर भएका हुनुहुन्छ । उनका पाउका दश अङ्गुलिका टुप्पाले मात्रै संसार ढाकिएको छ । महिमा बुझ्रेर सकिदैन । भगवानका तीन पाउ मध्ये एउटा पाउले स्वर्गादि सातै लोक , एउटा पाउले पृथिवी र तलका सबै लोक ढाकेको छ भने अर्को एउटा पाउ संपूर्ण प्राणीको मोक्षको कारण बनेको छ । संसारमा भएका सबै यज्ञ हवि आदि सबै वस्तु भगवान् नै हुनुहुन्छ र उनैबाट सबै प्रणी जात जाती देवी देवता लगायत सूर्य चन्द्र प्रकट भएका हुन् । यज्ञ पशू यज्ञ गर्नेवाला पनि उनै हुन् । पुण्यात्मा जनहरू श्रद्धासँग उनको उपासना गर्छन् र उनैलाई प्राप्त गर्दछन् ।

इन्द्र र वृहस्पतिको संयुक्तस्तुति

इन्द्र सदा शत्रुलाई जित्ने धीरगुणयुक्त युद्धपारङ्गत धनुषवाण हातमा लिइरहने हुनुहुन्छ । इन्द्रका सहयोगले युद्धवीरहरू सधै विजय पाइ रहुन् । वृहस्पतिले व्यवहार सीप युद्धसीप संग्राममा विजय पाउने शत्रुलाई भुलाउने ज्ञान चातुर्य दिउन् । इन्द्र गुरुसँग संबन्धित अदिति वरुण आदि सबै देवताहरूले सधै रक्षा गरुन् ।

सूर्य वन्दना

चन्द्रमाको अमृत रस सूर्य पान गरुन् । तेजले युक्त जप पोषक बनेर यज्ञ सम्पन्न गराउदै वायु युक्त भएर आकाशमा नथाकिकन सधै भ्रमण गर्नुहुन्छ यिनै सूर्य रस्मि अग्नि तेज विश्वलाई देखाउन धारण गरुन् ।
हे सूर्य तपाई ज्योति वनाउनु हुन्छ । तपाईनपुगेको ठाऊँ छैन ।
दिनको आगमनमा प्रकाश पैलाएर उज्यालो पार्नु हुन्छ । रात्रीको आगमनमा प्रकाश हरण गरेर संसारलाई अँध्यारो वनाउनु हुन्छ । साधु सन्तलाई मित्र दृष्टिले हेर्नुहुन्छ । दुष्टलाई कूरदृष्टिले हेर्नु हुन्छ । अद्वैतविशिष्टगुणयुक्त भइकन पनि निर्गुण हुनुहुन्छ । देवताहरुमा पूज्य हुनुहुन्छ । सुवर्णमय दिव्य रथद्वारा संसारलाई हेर्दै आउने जाने गर्दै दिनरात वनाउदै देवता र मनुष्यलाई आफ्ना आफ्ना स्थानमा बास गराउनु हुन्छ ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शिवस्तुति

भगवान् शिव संहारकारी क्रोध मूर्ति हुनुहुन्छ । हात हतियार शस्त्र अस्त्र सुसज्जित हुनुहुन्छ । हे भगवान् तपाईको शिवर मंगलमय नाम् हो । तपाईका हतियार दुष्टलाई संहार गर्ने बनून् । सज्जनका अगाडि हतियार नर हुन् । गर्भमा भएका बालक युवा तरुण वृद्ध कसैलाई पनि दुःख न दिएर सुख मात्र दिनुहोस् । छोरा नाति गाई वस्तु र ममा आश्रित सबैको सधै रक्षा गर्नुहोस् ।

हे भगवान् अगाडि पछाडि नमः जोडेर प्राय एक मन्त्रमा आठ नामले तपाईंको बन्दना गर्दछु । प्रसन्न होइ बक्सियोस् । तपाईंको सात्विक नाम उच्चारण गरेर प्रर्थना गर्दछु । मेरा हृदयमा सात्विक भाव भरिदिनुहोस् । हे भगवान ! तपाईंका राजसी नामछन् । ती नाम उच्चारण गर्दै प्रर्थना गर्दछु । गरेका उद्योग धन संपत्ति पुत्र पुत्रादि सम्पन्न गराइदिनुहोस् । हे भगवान ! तपाईका तामसी नाम छन् । ती नाम उच्चारण(ा गर्दै वन्दना गर्छु । मेरा पनि हृदयमा अति खराव तामसी भावहरूछन् । अविच्छिन्न जलधाराद्वारा परिकल्पित तपाईंको मङ्गलमय विग्रह पखालिएर शान्त शीतल हुँदा मेरा अन्तःकरण निवासी अहंभावमा संबन्ध जोडिएर (रिमोट परिचालन भए झै) शीत तापादि अहंकार दुष्टस्वभाव नाश गरिदिनुहोस् । हे भगवान् शिव हामीमा सम्पूर्ण सूर्यादिग्रह , नक्षत्र देवी देवता को प्रभाव पर्दछ । यी प्रभाव राम्रा पनि हुन सक्छन् नराम्रा पनि हुन्छन् । नराम्राबाट हुने आयु आरोग्य ऐश्वर्यमा हुने हानि दुर्घटना आदिबाट बचाइदिनुहोस् । गर्ने गराउने शक्ति तपाईंकै आधीनमा छ । ती हानीकारक कारण तत्ववस्तुहरु टाढैबाट फ्याकीदिनुहोस् । तपाईंको महिमा बर्णन गरेर सकिदैन । केवल पञ्चाक्षरी महामन्त्र जोडिएका र वैदिक छन्दद्वारा गरेको स्तुति बन्दनाद्वारा प्रसन्न हुनुहोस् । यसरी नाम उच्चारण गरिसकेपछि भगवानसँग प्रार्थना गरिएकोछ । हे भगवान् शिव ! तपाईंका ती त्रिशूल धनुष् वाण वृक्षमा थन्क्याउनु होस् । हामीलाई कल्याण गर्नुहोस् । तपाई औषधरूप हुनुहुन्छ । हामीलाईं औषधी पिलाएर जमदग्नि कश्यप र देवताहरूका आयुको तीन डबल आयुवाला बनाइदिनुहोस् । सन्तान आयु अन्न धन पराक्रम सुयश वृद्धिकालागि सम्मान गर्छौं ,झुक्छौ आराधना गर्दछौ । इति गोपेश्वर माहात्म्य देवाराधना नाम नवम अध्याय ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अथ दशमोऽध्यायः

सूत उवाच

अर्चनामभिषेकं च परमश्रद्धया मुदा ॥
कुर्वीतैकमना भूत्वा पठन् मन्त्रानिमान् स्वयम् ॥१॥

ऋचं हि वाचं शरणं प्रपद्ये
यजुः स्वरूपं हृदयं पुनश्च ॥
प्राणान् हि साम. श्रुतिरेव चक्षुः
वाक्-श्वास-देहादिवलं मयि स्यात् ॥२॥

चक्षुर्मनोवुद्धिषु मेऽस्ति यत्तत्
वृहस्पतिश्छिद्रमपाकरोतु ॥
जीवाधिपो यज्ञपतिः सुरेश :
स नः सुखं वर्धयतामजस्त्रम् ॥३॥
ध्यायामः सवितुर्वीर्यं सर्वकल्मषभर्जकम् ॥
सविता नो धियो नित्यं सत्कर्मणि प्रचोदयेत् ॥४॥
तर्पणेनानुष्ठानेन पूज्य इन्द्रोऽस्ति नः सखा ॥
स्पष्टवाग्रूपयज्ञेन पूजितः: स प्रवर्धते ॥५॥
अन्नस्य सोमरूपस्य कस्त्वां माद्यति[1] सन्ततम् ॥
येनांशेन प्रमत्तःसन् धनधान्यं ददासि नः ॥६॥
हे इन्द्र ?सम्मुखो भूत्वा स्तोतृणामविताऽसि नः ॥
वहुरूपः प्रसन्नः सन् रक्षणाय स्थिरो भव ॥७॥
अर्पणेन वृषन् ? केन यथा मोदयसि प्रभो ?॥
हविर्दानं तथा कुर्मः सेवकान् परिपोषय ॥८॥
विश्वस्यैश्वर्यरूपः स आदित्यः परमेश्वरः
पुत्रादीनां पशूनां नः सुखरूपोऽस्तु सर्वदा ॥९॥
अर्यमा वरुणो मित्रो विष्णुरिन्द्रोवृहस्पतिः ॥
गतिं शान्तिं सुखं सौम्यं वलं धियं ददातु नः ॥१०॥
पवनः सुखदो भूयात् दद्यान्नः सूर्य औषधम् ॥

१.उत्तेजित गराउँछ

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पर्जन्यो गर्जनां कुर्वन् वृष्ट्या सिञ्चतु मेदिनीम् ॥११॥
दिनानि सुखरूपाणि भवेयुः सुखदा निशाः ॥
इन्द्राग्नी सुखदौ स्यातां वरुणेन्द्रौ च पालकौ ॥१२॥
सोमेन्द्रपूषणो देवा भवन्तु रोगनाशकाः ॥
अभीष्टसिद्धये देव्य आपश्च पीतये सदा ॥
भवन्तु रोगनाशिन्यो हविराहुतिकर्मणा ॥१३॥
पृथिवि ? सुखदा भूया अकण्टका निवेशिनी[२] ॥
धान्यदा शर्मदा ह्येवं पापं नो दह सर्वदा ॥१४॥
हे आप? सुखदाः यूयं विक्रम-प्राण-पुष्टिदाः ॥
तिष्ठत हृदयेऽस्माकं श्रेयसे देहपुष्टये ॥१५॥
शिवतमो रसो योऽस्ति तं प्रापयत नः सदा ॥
यत्स्तन्यं पाययन्तीव वालं हर्षेण मातरः ॥१६॥
ब्रह्मादिस्तम्बपर्यन्तं रसेन तृप्यति जगत् ॥
आप ? कुरत नः सर्वान् समर्थान् तद्रसेन ह ॥१७॥

या शान्तिरस्ति दिवि भूमिषु या नभस्सु
या शान्तिरोषधिषु या तरुपल्लवेषु ॥
वेद्येषु विश्वविवुधेषु जलेषु शान्तिः
सर्वेषु शान्तिरिति सा मयि चास्तु नित्यम् ॥१८॥

जना मित्रनेत्रेण पश्यन्तु सर्वे
सदा तानहं मित्रदृष्ट्या समीक्षे ॥
भवाम प्रिया मित्रभावेन लोके
महावीर ? शान्तान् दृढान्नो विधेहि ॥१९॥

आराधनेन हे वीर ? प्रसन्नः सुस्थिरो भव
वयं ते दयया शम्भो ? भूयास्म चिरजीविनः ॥२०॥
नमस्ते तेजसे तस्मै यः सर्वान् हरते रसान् ॥
नमोऽस्तु तेऽर्चिषे वह्ने ? पावको न शिवो भव ॥२१॥

नमो विद्युत्स्वरूपाय नमस्ते स्तनयित्नवे[५] ॥

---

२. सज्जनहरूल वासगरिने वा वासवस्ने जन सज्जन बन्ने ५. गर्जना गर्ने

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नमस्ते भगवन्नित्यं यतस्त्वं सुगतिप्रदः ॥२२॥
यतो दुष्टचरित्रात्त्वमपाकर्तुं समीहसे[६] ॥
प्रजाभ्यश्च पशुभ्यश्च ततः शं नोऽभयं कुरु ॥२३॥
आप ओषधयः सन्तु सुमित्रत्वेन संस्थिताः ॥
दुर्मित्रत्वेन ता द्विष्मो वयं तान् द्वेष्टि यश्च नः ॥२४॥
आदित्यरूपं जगतांसुनेत्रमुदेत्यसौ देवहितं[७] पुरस्तात् ॥
तस्य प्रसादात् शरदः शतानि जीवेम पश्येम भवेम भूयः ॥२५॥
सर्वदेवमयं शान्तं गोपेश्वरं महेश्वरम् ॥
निधाय हृदि विश्वेशं भक्त्या परमया मुदा ॥२६॥
कायेनाहारशुद्धेन संस्कृतवचनेन च ॥
पुष्परत्नादिभिः शुभ्रैः पूजयेन्निम्ननामभिः ॥२७॥
ॐ हिरण्यवाहुरीशानः पशुपतिरुमापतिः ॥
त्विषीमानुपवीतिश्च[८] शष्पिञ्जरो[९] जगत्पतिः ॥२८॥
बभ्लुशो[१०] हरिकेशश्च रुद्रः क्षेत्रपतिः शिवः ॥
रोहितो वीरभद्रश्च गिरिशो नीललोहितः ॥२९॥
ऊर्म्यो[११] ऽपराजितः शम्भुर्भुवनेशो महेश्वरः ॥
अहिर्वुध्न्यो[१२] भवः शर्वः शंकरश्चन्द्रशेखरः ॥३०॥
भूतेशः शितिकण्ठश्च कपाली प्रमथाधिपः ॥
व्योमकेशो विरूपाक्षो वामदेवस्त्रिलोचनः ॥३१॥
अन्धकारिः[१३] कृत्तिवासा[१४] पिनाकी च महानटः ॥
शीघ्र्यो याम्यस्तथा वृद्धो नादेयोऽपरजो हरः ॥३२॥
सेनानी पूर्वज उग्रः सभापतिरिलापतिः ॥
ज्येष्ठः कनिष्ठः उर्वर्ज्यो[१५] वन्यः[१६] कक्ष्यः[१७] श्रेवो[१८] मृडः[१९] ॥३३॥
श्रीकण्ठो नीलकण्ठश्च शिपिविष्टो[२०] हुताशनः ॥

---

६. राम्ररी चाहनु हुन्छ । ७. देवताले स्थापना गरेको वा देवप्रिय ८. ज्योतिष्मान् ९. झार पात जस्तो रूप भएका १०. कैलो वर्ण भएका ११. पानीको छालमा बस्ने १२. शिरमा सर्प बेर्ने १३. अन्धकासुर लाई मार्ने १४. छालाको वस्त्र लागाउने १५. मलीलो भएका, चाहेकोफल धेरै दिने १६. वृक्षका फेदमा बस्ने १७. नदीकिनार, पर्वतफेदी वा गुफामा बस्ने १८. शब्द वा ध्वानिहरू हुने १९. सुख दिने २०. विष्णुः- शिपिविष्टः (पशवो वै शिपिः, यज्ञो वै सिपिः इति श्रुतिः)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विल्मी[२१] वर्मी[२२] वरुथी[२३] च दुन्दुभ्यः[२४] कवची भगः ॥३४॥
कामहा कामकृद् भर्गः त्र्यम्वकस्त्रिपुरान्तकः ॥
कपर्दी धूर्जटिस्स्थाणु गङ्गाधरो वृषध्वजः ॥३५॥
शम्भवः[२५] किंशिलः पार्यो[२६] मयोभवो[२७] मयस्करः[२८] ॥
धृष्णुरिषुधिमान्[२९] ब्रज्यो[३०] हृदय्यो[३१] गेह्य ईश्वरः ॥३६॥
गोष्ठ्यस्तल्प्यो[३२] [३३]गह्वरेष्ठस्तीर्थ्यः[३४] कुल्यस्त्रिशूलधृक् ॥
वृहन् ह्रस्वः प्रतिसर्य्य[३५] आशुतुट् प्रमथः सवृद्[३६] ॥३७॥
आखिदन्[३७] प्रखिदन्[३८] पर्णः[३९] फेन्यः[४०] पर्णशदो[४१] ऽग्रजः ॥
मृत्युञ्जयो महाकाल इति स्तोत्रमुदीरयेत् ॥३७॥
प्रणम्य शिरसा देवं क्षमायाचनपूर्वकम् ॥
धूपदीपादिकं पश्चादारार्त्रिक्यं समाचरेत् ॥३८॥

आरतिः

ओं जय जगदीश हरे प्रभो जयजगदीश हरे ॥
भक्तानां भयभञ्जन जनमनोरञ्जन जय परमेश हरे ॥३९॥
ओं जयजगदीश हरे ॥
जय गोपेश्वरः विभुरखिलेश्वरः जय विभवेश्वरः स्वामी ॥
जगतां घटघटवासी मायामोहविनासी ॥
ओं जय० ॥४०॥
त्वं प्रलयङ्करः त्वं ह्यभयङ्करः त्वमेव शक्तिविधाता ॥
जगत्कर्ता जगद्हर्ता जगत्पालनकर्ता ॥ ओं जय० ॥४१॥
कामप्रदाहकः कोधविदारकस्त्वं परमानन्ददायी ॥

---

२१. शिरमा मुकुट लगाउने २२.लोहमय वर्म ढाल वोक्ने २३. हातीमाथिको घरजस्तो ठाउँमा बस्ने हौदामा बस्ने २४. दमाहाको आवाज जस्तो गर्जन गर्ने २५ गप्रेटे दुङ्गा जस्ता जर्जरिएका बन्ने २६. मुक्तिप्राप्त गरेर रहनु भएका २७. सुखमय वनेका २८. उपासकलाई मुक्ति सुख दिने २९. घमण्डगर्ने ३०. गोसमूहमा बस्ने वा सन्यासी बन्ने ३१.जीव स्वरूप बनेर बस्ने ३२. शय्यामा शयन गर्ने ३३. पानी भित्र वा गुफा भित्र बस्ने ३४. जहावस्तु हुन्छ त्यहाँ तीर्थ बनाउने ३५.अभिचार साधना गर्नेलाई सिद्धि दिने ३६. विद्या विनय आदि ज्ञानले पूर्ण भएका ३७. अभक्तलाई देखेर खिन्न हुने ३८। ज्यादै दुष्ट्याँइ गर्नेलाई खिन्न गराउने रुवाउने । ३९.पातस्वरूप भएका ४०. पानीको फीजमा हुने ४१. पतितपर्ण देशवासी

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ज्ञानप्रदायकः शान्तिविधायकः नित्यं सुखदायी ॥
ओं जय० ॥४२॥
ब्रह्मा त्वमेव विष्णुस्त्वमेव त्वमेव हि महादेवः ॥
श्रुति-स्मृति-दर्शनसम्मतः त्वमेव जगदीशः ॥
ओं जय० ॥४३॥
ततः पुष्पाञ्जलिंचार्घ्यं समर्प्य विधिपूर्वकम् ॥
दक्षिणादिभिरभ्यर्च्य पूर्णकामो निवर्तयेत् ॥४४॥

आराधितोऽसौ भगवान् महेशः
शुक्लं च तद्देवहितं सुचक्षुः ॥
तेनोदगादेव शरच्छतानि
जीवेम पश्येम वयं प्रसन्नाः ॥३९॥

इति श्रीगोपेश्वरमाहात्म्ये शान्तिपाठविधिर्नाम दशमोध्यायः ॥१०॥

दशम अध्यायको सारांश

सूतमुनि जी भन्नुहुन्छ हे शौनक ! मनलगाएर श्रद्धाले तल उल्लिखित मन्त्र पढ्दै शिवजीको अर्चना गर्नु पर्दछ ।

ऋग् यजुः साम वेदको शरण लिदै प्रार्थना गर्दछु । वेदले वोली हृदय प्राण आँखा र शरीरमा बल बढाइदिउन् । वृहस्पतिले आँखा मन बुद्धिमा हुने कमजोरी हटाइदिउन् । जीवाधिपति यज्ञेश भगवानले नित्य सुख बढाइदिउन् । सूर्यको पापनाशक तेजको ध्यान गर्दछु । सूर्यले हाम्रो बुद्धि सत्कर्ममा लगाइदिउन् । ब्रह्मा विष्णु अर्यमा वरुण मित्र शिव वृहस्पति इन्द्र सबै देवताहरूले हामीलाई शुभगति शान्ति सुख सौम्य बल र बुद्धि दिउन् । सूर्यले औषधी दिउन् , मेघले सुवृष्टि गराउन् । पृथिवी शस्यश्यामला सुखदा बनुन् । पानी अमृत बनोस् । स्वर्गमा आकासमा भूमिमा औषधीमा वृक्षहरूमा देवतामा जलमा जुन शान्ति छ त्यो शान्ति ममा होस् । दुष्ट चरित्र हराएर सुचरित्रवान बनाइदिनुहोस् । सुमित्र भावले रहेका पानी औषधी बनून् , दुर्मित्र भावले रहेको पानीलाई द्वेष गर्दछौ फ्याक्तछौ । हे भगवान जसजसले हामीलाई वैरभाव गर्छ त्यसलाई हटाइदिनुहोस् । जसले हामीलाई राम्रो गर्छ त्यसलाई बढाइ दिनुहोस् ।

यसरी प्रार्थना गरिसकेपछि भगवान शिवलाई वेलपाती फूल अथवा फलहरू नाम उच्चारण गर्दै १०८ चढाउनाले पूजा सिद्ध हुन्छ ।

यहाँ एकशय आठ शिवका नाम छन् । ती हुन् :

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

१	ॐहिरण्यबाहवे नमः	२	ईशानाय नमः
३	पशुपतये नमः	४	उमापतये नमः
५	त्विषीमते नमः	६	उपवीतये नमः
७	शष्पिञ्जराय नमः	८	जगत्पतये नमः
९	बभ्लुशाय नमः	१०	हरिकेशाय नमः
११	रुद्राय नमः	१२	क्षेत्रपतये नमः
१३	शिवाय नमः	१४	रोहिताय नमः
१५	वीरभद्राय नमः	१६	गिरिशाय नमः
१७	नीललोहिताय नमः	१८	ऊर्म्याय नमः
१९	अपराजिताय नमः	२०	शम्भवे नमः
२१	भुवनेशाय नमः	२२	महेश्वराय नमः
२३	अहिर्बुध्याय नमः	२४	भवाय नमः
२५	शर्वाय नमः	२६	शंकराय नमः
२७	चन्द्रशेखराय नमः	२८	भूतेशाय नमः
२९	शितिकण्ठाय नमः	३०	कपालिने नमः
३१	प्रमथाधिपाय नमः	३२	व्योमकेशाय नमः
३३	विरूपाक्षाय नमः	३४	वामदेवाय नमः
३५	त्रिलोचनाय नमः	३६	अन्धकारये नमः
३७	कृतिवाससे नमः	३८	पिनाकिने नमः
३९	महानटाय नमः	४०	शीघ्र्याय नमः
४१	याम्याय नमः	४२	वृद्धाय नमः
४३	नादेयाय नमः	४४	अपरजाय नमः
४५	हराय नमः	४६	सेनान्यै नमः
४७	पूर्वजाय नमः	४८	उग्राय नमः
४९	सभापतये नमः	५०	इलापतये नम
५१	ज्येष्ठाय नमः	५२	कनिष्ठाय नमः
५३	उर्वज्याय नमः	५४	वन्याय नमः
५५	कक्ष्याय नमः	५६	श्रवाय नमः
५७	मृडाय नमः	५८	श्री कण्ठाय नमः
५९	नीलकण्ठाय नमः	६०	शिपिविष्टाय नमः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

६१ हुताशनाय नमः
६२ विल्मिने नमः
६३ वर्मिणे नमः
६४ वरुथिने नमः
६५ दुन्दुभ्याय नमः
६६ कवचिने नमः
६७ भगाय नमः
६८ कामघ्ने नमः
६९ कामकृते नमः
७० भर्गाय नमः
७१ त्र्यम्वकाय नमः
७२ त्रिपुरान्तकाय नमः
७३ कपर्दिने नमः
७४ धुर्जटिने नमः
७५ स्थाणवे नमः
७६ गङ्गाधराय नमः
७७ वृषध्वजाय नमः
७८ शम्भवाय नमः
७९ किंशिलाय नमः
८० पार्याय नमः
८१ मयोभवाय नमः
८२ मयस्कराय नमः
८३ धृष्णवे नमः
८४ इषुधिमते नमः
८५ ब्रज्याय नमः
८६ हृदयाय नमः
८७ गेह्याय नम.
८८ ईश्वराय नम.
८९ गोष्ठ्याय नम.
९० तल्प्याय नम.
९१ गह्वरेष्ठ्याय नम.
९२ तीर्थ्याय नम.
९३ कुल्याय नम.
९४ त्रिशूलधृषे नम.
९५ वृहते नम.
९६ ह्रस्वाय नम.
९७ प्रतिसर्याय नम.
९८ आशुतुषे नम.
९९ प्रमथाय नम.
१०० सवृधे नम.
१०१ आखिदते नम.
१०२ प्रखिदते नम.
१०३ पर्णाय नम.
१०४ फेन्याय नम.
१०५ पर्णसदाय नम.
१०६ अग्रजाय नम.
१०७ मृत्युञ्जयाय नम.
१०८ महाकालाय नम.

यी नाम उच्चारण गर्नालेमात्रपनि पूजा कर्म पूर्ण हुन्छ । धूप दीप नैवेद्य अर्पण गरी आरती पुष्पाञ्जली गर्ने आराधना गरिएका भगवान शिव एवं देवताद्वारा सुरक्षा गरिएको दिव्य चक्षु प्राप्त होस् र शयवर्ष देख्न सकूँ , वाच्न सकूँ भनी प्रार्थना गर्नु पर्दछ । पूजा पाठ पूरा हुन्छ ।

श्री गोपेश्वर माहात्म्यमा शान्ति पाठ विधि नाम दशम अध्याय ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अथ एकादशोऽध्यायः

शौनक उवाच

कृतमाराधनं कर्म केनोपायेन सिध्यति ॥
तदुपायं सदाचारं वद नो विदुषां वर ? ॥१॥

सूत उवाच

उपायं सरलं सौम्य ? गुह्यज्ञानं ब्रवीम्यहम् ॥
दृढ एकमना भूत्वा हृदि धारय पालय ॥२॥
परस्वभावकर्माणि यः प्रशंसति निन्दति ॥
स आशु भ्रस्यते पुण्यात्तस्मादेतत्परित्यजेत् ॥३॥
सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात् सत्यमप्रियम् ॥
भवन्ति स्वादुवचनात् प्रसन्ना देवता नराः ॥४॥
मनसा कर्मणा वाचा न हिंस्यात् कान् कदाचन ॥
भवन्ति शत्रुमित्राणि वचनेन हि सर्वदा ॥५॥
जातीयवर्गभेदेन घृणाकर्म परित्यजेत् ॥
सर्वे वर्णाः स्वकीयेषु पूजनीया भवन्ति हि ॥६॥
परस्यापहृतं किंचित् रतिमात्रं च तद्धनम् ॥
वृद्धिं शान्तिं धनायुष्यं सर्वं हरति निश्चयः ॥७॥
अमृतं स्वार्जितं द्रव्यं परं कल्याणकारकम् ॥
परदत्तमृणं ज्ञेयमपहृतं विषं हि तत् ॥८॥
मातृपितृगुरुभ्रातृबान्धवाः साधूसूरयः ॥
सेवनीयाः सदा तेभ्य आशीर्वादो हि लभ्यते ॥९॥
सर्वलक्षणहीनो ऽपि यः सदाचारवान् भवेत् ॥
श्रद्दधानोऽनसूयश्च शतं वर्षाणि जीवति ॥१०॥ नीतिः
पुनन्ति सर्वदा वेदाः सदाचारवतो नरान् ॥
नैव पुनन्त्यनाचारान् षडङ्गपठितानपि ॥११॥
रागद्वेषविनिर्मुक्तः सर्वभूतहितेरतः ॥
दृढबोधश्च धीरो यः स गच्छेत् परमं पदम् ॥१२॥
यस्मिन् सुशीलता शान्तिः सुस्मितं वदनं सदा ॥
नम्रता मधुरा वाणी सः सदाचारवान् जनः ॥१३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अभिवादनशीलस्य नित्यं वृद्धोपसेविनः ॥
चत्वारि तस्य वर्धन्त आयुर्विद्यायशोवलम् ॥१४॥ नीतिः
एवमाराधिता देवाः स्तुतिपूजाजपादिभिः ॥
श्रेयः कुर्वन्ति तत्सत्यं सत्यमेवेति निश्चयः ॥१५॥
शास्त्रसारं गीतासारं नीतिसारं च निर्मलम् ॥
चिन्तयेत् पालयेन्नित्यं स्वश्रेयसे ऽमृताय च ॥१६॥
अहं किं करवाणीति संसारमोहकारणात् ॥
कर्मच्युतो न वर्तेयमेवं मनसि धारयेत् ॥१७॥
अनित्यं वस्त्रवद् गात्रं जीवो भिन्नः सनातनः ॥
विवेकेन विचार्यैव शोकमोहौ परित्यजेत् ॥१८॥
परोपकारकार्यं हि कुर्वन् कर्मपरायणः ॥
निष्कामभावयुक् यः स कल्याणमधिगच्छति ॥१९॥
कर्मवन्धनमोक्षाय ज्ञानवान् शीलवान् भवेत् ॥
श्रद्धावान् त्यागवान् यः स वृजिनं[1] सन्तरिष्यति ॥२०॥
कायेन मनसा बुद्ध्या योगाभ्यासबलेन वा ॥
कर्मादिविषयान् त्यक्त्वा शान्तिमाप्नोति नान्यथा ॥२१॥
आत्मसंयमयोगेन नर आत्मानमुद्धरेत् ॥
शान्तिमृच्छत्यवश्यं हि जन्मनि चान्यजन्मनि ॥२२॥
अष्टप्रकृतिमादाय विश्वं सृजति हीश्वर : ॥
ज्ञात्वा तस्योर्जितं तत्वं स्वभावमनु गच्छति ॥२३॥
प्राणप्रयाणसमये यद्रूपं हृदि तिष्ठति ॥
तद्रूपं लभ्यते तस्मात् गतिसाधनमाचरेत् ॥२४॥
भगवत्प्राप्तये वर्णाः सर्वेऽधिकारिणो मताः ॥
अनन्याश्चिन्तयन्तो ये ते लभन्ते परां गतिम् ॥२५॥
श्रीमदुर्जितरूपाणि स्वरूपाणीश्वरस्य हि ॥
तं तमीश्वरभावेन भजेत् सुगतिसाधकः ॥२६॥
विश्वं भगवतो रूपं पश्यन् सन् ज्ञानचक्षुषा ॥
प्रप्नोति परया भक्त्या विराटरूपदर्शनम् ॥२७॥
सर्वेषु साधनेष्वेषु भक्तिरेव गरीयसी ॥

१.पापको समुन्द्र

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सन्तुष्टो भक्तियुक्तो यः स एव भगवत्प्रियः ॥२८॥
वपुः क्षेत्रं सदा ज्ञेयं क्षेत्रज्ञो जीव उच्यते ॥
क्षेत्रक्षेत्रज्ञयोर्ज्ञाता भगवानीश्वरः स्मृतः ॥२९॥
तुल्यप्रियाप्रियो धीमान् पराभक्तिसमन्वितः ॥
त्रीन् गुणान् समतीत्यैव ब्रह्मभूयाय कल्पते ॥३०॥
संसारस्य महाधार एको हि पुरुषेत्तमः ॥
इति मत्वा ऽनन्यभावस्तं भजेत् श्रद्धयान्वितः ॥३१॥
सावधानेन वै दैवीं सम्पतिं समुपार्जयेत् ॥
आसुरीं सम्पदं त्यक्तुं सदा प्रयत्नवान् भवेत् ॥३२॥
दैवीसम्पतिभिर्युक्तो नरो देवसमो मतः ॥
आसुरीभिर्नरः क्रोधी भवेत् स दुष्टराक्षसः ॥३३॥
उत्तमं सात्विकं कर्म राजसं मध्यमं स्मृतम् ॥
अधमं तामसं तस्मात् सेव्यं सात्विकमेव हि ॥३४॥
सात्विकं सुखदं बोध्यं राजसं शोककारकम् ॥
तामसं सर्वथा त्याज्यं सदा नरककारकम् ॥३५॥
शास्त्राणां सारजा गीता गीतायाः सारजो हरिः ॥
गीताशास्त्रं हरेर्वाक्यं सर्वशास्त्रेष्वनुत्तमम् ॥३६॥
विवेकेन जनैः सर्वैरात्मकल्याणसाधकैः ॥
गीताया वचनाद् ग्राह्या भगवच्छरणागतिः ॥३७॥
अभिलाषाऽस्ति दीक्षायां लग्नेशपञ्चमेशयोः ॥
मित्रामित्रे विचार्यैव दीक्षां गृह्णातु नान्यथा ॥३८॥
तयोर्मित्राधिदेवस्य पूजनात्सेवनादपि ॥
इहलोके परे लोके सुखशान्तिर्भविष्यति ॥३९॥
परमेशस्य यद्रूपमन्तःकरणतः स्वतः ॥
स्वीकृतं परया भक्त्या तस्यैव शरणागतिः ॥४०॥
तीर्यतेऽनेन पापेभ्यो मुच्यते च ऋणत्रयात् ॥
तस्मात्तीर्थमिति प्रोक्तं तीर्थं हि सेव्यतां नरैः ॥४१॥
तीर्थं माता पिता तीर्थं गुरुसज्जनवान्धवाः ॥
भू-नदी-शैल-गो-वृक्षाः तीर्थान्येतानि चिन्तयेत् ॥४२॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पृथ्व्यप्तेजोमरुद्व्योमपुञ्जं शरीरपुष्टिदम् ॥
जन्मस्थानं प्रियं तस्मादुत्तमं तीर्थमुच्यते ॥४३॥
य इदं सुमहत्पुण्यं माहात्म्यं श्रद्धया पठेत् ॥
श्रावयेत् श्रृणुयाद् वापि स वै शान्तिमवाप्नुयात् ॥४४॥
भूत-प्रेत-पिसाचानां ग्रहादीनां च भूतले ॥
ये दोषाः कष्टदाः सन्ति नश्यन्ति पठनान्ननु ॥४५॥
श्रेयो वाञ्छन् सदा जाग्रत्संयुक्तो भूतिकर्मसु ॥
स्वभावमात्मनि नित्यमुन्मुखं कारयेद् वुधः ॥४६॥
अत्र ये वर्णिता देवा माहात्म्यसिद्धये मया ॥
सिद्धिं ददतु ते मह्यं श्रद्धाविश्वासकारिणे ॥४७॥
माहात्म्यसिद्धिकामोऽहं कृतवान् स्तुतिवन्दनाम् ॥
वन्दिता जन्मभूदेवा कामनाः पूरयन्तु मे ॥४८॥
गोपेश्वरस्य माहात्म्यं श्रवणाच्छ्रवणान्नरः ॥
जनन्या जन्मभूमेश्च प्रसादात् सुखमाप्नुयात् ॥४९॥
आयुर्धनं यशः शान्तिमैश्वर्यं सन्ततिं सदा ॥
गोपेश्वरः प्रसन्नः सन् वर्धयति दिने दिने ॥५०॥
एकादशाध्याययुतं माहात्म्यं वन्दनात्मकम् ॥
गेपेश्वरप्रसादेन काव्यत्वसिद्धिमात्नुयात् ॥५१॥

शस्याढ्या धरणी भवेत् तरुलतापुष्पैश्च पूर्णं वनम्
नद्यः पूर्णजला भवन्तु महिषा गावश्च दुग्धालवः
वालाः शास्त्रपरायणाः सुचतुरा सौभाग्यवत्यः स्त्रियः ॥
उद्योगे निरता भवन्तु पुरुषा गोपेश्वरानुग्रहात् ॥५२॥

इति श्रीगोपेश्वरमाहात्म्ये सदाचारनिर्णयो नाम एकादशोऽध्यायः ॥११॥

एकादश अध्यायको सारांश

शौनकजी सोध्नु हुन्छ । गरेको आराधना कर्म कसरी स्थायी रहन्छ सिद्ध हुन्छ । त्यो उपाय र सदाचार बताइदिनु होस् । सूत मुनि जी भन्नुहुन्छ हे शौनक ! यो उपाय सजिलो छ । यो गोप्य ज्ञान हृदयमा धारण गर्नु पर्ने हो र पालन पनि गर्नुपर्ने हो । मानिस कसैले पनि अर्काको निन्दा प्रसंशा केही गर्नु हुदैन । निन्दा र प्रसंशा गर्ने एकदिन गिर्दछ । साँचो बोल्नु, प्रिय

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

बोल्नु, साँचै भएपनि अप्रिय नवोल्नु मीठो वोली वचनद्वारा नै देउता मानिसहरु सवै खुशी हुन्छन् । मन वचन कर्मले कसैलाई पनि हिंसा गर्नु हुदैन । वचनले नै शत्रु र मित्र वन्दछन् । जातीय वर्ग भेद गरेर कसैले कसैको घृणा गर्नु हुदैन । सवै वर्ण आफ्ना आफ्ना क्षेत्रमा पूजनीय छन् । अर्काको धन वस्तु रति मात्र पनि चोर्नु हुदैन । चोरेका धनले बुद्धि शान्ति धन आयु नाश गरिदिन्छ । वाहुबलले आर्जन गरेको धन अमृत हो । अर्काले दिएको धन ऋण हो र अपहरण गरेको धन विष हो । माता पिता गुरु भाइवन्धु इष्टमित्रहरू सबैको सेवा सम्मान गर्नु पर्दछ । तिनीहरूबाट आशीर्वाद पाइन्छ । संपूर्ण प्राणी हित गर्ने विद्वान दिव्य पद प्राप्त गर्दछ । जसमा नम्रता मधुरता मीठो वचन सुशीलता शान्ति र हसिलो मुख छ त्यो सदाचारी हो ज्ञानबृद्ध वयोवृद्ध सवैको जो नमस्कार वन्दना गर्दछ त्यसको आयु विद्या यश र बल बढ्दछन् । देवताको स्तुति पूजा जप गर्नेको कल्याण निश्चय हुन्छ । वर्तमान र भविष्यकोलागि नीति गीता शास्त्र सार चिन्तन गर्नु उपयोग्य हुन्छ । अठार अध्याय गीताको अठार श्लोकमा सार छ । यो सार अनुसार भगवत्सरणागति नै जीवन सार्थक हो । शरणागति तीर्थ हो । पिता माता गुरु सज्जन वान्धव इष्टमित्र जन्मभूमि नदी पहाड गाई र वृक्ष यी सवै तीर्थ हुन् । तीर्थको सेवा सम्मान गर्नाले पवित्र वन्न सकिन्छ । यो गोपेश्वर माहात्म्यको जप पाठ एवं मनन गर्नाले अरुलाई सुनाउनाले भगवान खुशी भएर आयु धन यश शान्ति र ऐश्वर्य वढाई दिनु हुन्छ ।
अन्त्यमा रचनाकारद्वारा एघार अध्यायको गोपेश्वर माहात्म्यले. काव्य स्वरूप प्राप्त गर्न सकोस भन्दै पृथिवी उर्वरा, फलफूल पूर्ण वृक्षलता, बालक पढालु, गाई दुधालु ,नारीहरूसौभाग्यवती,पुरूषहरू उद्योगी गोपेश्वर भगवानका अनुग्रहले होउन्, भन्ने शुभकामनाका साथ यो माहात्म्य पूर्ण भएको छ । हरि ॐ तत्सत् इदंमाहात्म्यं सम्पूर्णम्

आधार-ग्रन्थाः

१. वेदः २. उपनिषद् ३. पुराणम् ४. महाभारतम्
५. गर्गसंहिता ६. किरातार्जुनीयम् ७. पाठ्यपुस्तकानि
८. वृद्धवचनानि ९.ख्यातिप्रसिद्धिश्च ।

एभ्यः प्रसंगवशादुधृतांशाः सन्ति ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

माहात्म्य प्रकाशनमा सहयोगी दाताहरु

१. श्री खेमनाथ निरौला पिप्ले-४, तेह्रथुम रु. ५०००
२. श्री गोविन्द शरण (सन्त) गुफा मन्दिर पिप्ले रु. २०००
३. श्री रामबहादुर श्रेष्ठ (राम साहु) इटहरी रु. २०००
४. श्री देवीशरण (सन्त) गुफा मन्दिर पिप्ले रु. १००१
५. पं. काशीनाथ कट्टेल धरान- १६ रु. १००१
६. पूज्य पिता सूर्यप्रसाद दाहाल ज्यूको नाममा केशव प्रसाद दाहाल मृगौलियाबाट रु. १००१
७. श्री राधादेवी लुइटेल धरान - १६ रु. ५००
८. श्री रेणुका देवी लुइटेल (घिमिरे) रु. ५००
९. श्री केशव अधिकारी धरान- १६ रु. १०२
१०. सुश्री सुरक्षा अर्याल पोखरीया, विराटनगर -१ रु. १०१
११. श्री सुदीप निरौला सरस्वती टोल, विराटनगर-१० रु. १०१
१२. श्रीमती शान्ता निरौला (घिमिरे) इनरुवा-९ रु. १०१
१३. सुश्री गीता निरौला सरस्वती टोल, विराटनगर-१० रु. १०१
१४. श्री विश्वास घिमिरे कञ्चनबारी विराटनगर-४ रु. १०१
१५. श्री नवीन पोखरेल (आगत) अरुणमार्ग विराटनगर-७ रु. १०१
१६. श्री मिजास घिमिरे धनकुटा नगरपालिका रु. १०१
१७. पं. चन्द्रप्रसाद कट्टेल धरान रु. १०१
१८. पं. हेमन्त अर्याल धरान रु. १०१
१९. पं. हरिराज बराल धरान रु. १०१
२०. श्री रमेश घिमिरे उप.प्रा. पिण्डेश्वर विद्यापीठ धरान रु. १०१
२१. पं. डमरु लम्साल च.सं. मा.वि. शिक्षक धरान रु. १०१
२२. श्री वृद्धिप्रसाद दाहाल च.सं. मा.वि. धरान रु. १०१
२३. श्री दीपक पराजुली च.सं. मा.वि. शिक्षक रु. १०१
२४. श्री दामोदर दाहाल धरान-१६ रु.१०१
२५. श्री तोयाराज कोइराला सह. प्रा. श्री पिण्डेश्वर विद्यापिठ धरान रु. १०
२६. श्रीमती सुशीला पौडेल शिक्षिका च.सं. मा.वि. धरान रु. १०१
२७. श्री बज्रंगलाल अग्रवाल धरान -१ रु. १०१
२८. श्री तीर्थराज कोइराला इटहरी -२ रु. १०१

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लेखकद्वयको परिचय

नामथर : श्री खेमनाथ निरौला
जन्ममिति : २२/१०/१९४५ सन्
जन्मस्थान : पिप्ले गा.वि.स.- ४,तेह्रथुम
शैक्षिक योग्यता : एम.ए.,बी.एड.र साहित्यशास्त्री
अनुभव : २७ वर्ष माध्यमिक तहमा शिक्षक
: २५ वर्ष क्याम्पसमा प्राध्यापन
: ३ वर्ष निजामति कर्मचारी
: १२ वर्ष रेडक्रस शाखा सभापति
तह : मा. वि. द्वितीय तहमा शिक्षण तथा उप-प्राध्यापक म्याङलुङ क्याम्पस, तेह्रथुम
रुची : सामाजिक सेवा, कविता लेखन र धार्मिक कार्यक्रममा संलग्नता
सम्प्रति : रेडक्रस जिल्ला सभापति तेह्रथुम शाखा, अध्यक्ष श्रीगोपेश्वर शिवालय पिप्ले, संस्थापक उप-प्राध्यापक म्याङलुङ क्याम्पस, तेह्रथुम
पदक : जुनियर रेडक्रस रजत जयन्ती पदक र प्रशंसापत्र
: जिल्ला शिक्षा समिति तेह्रथुम बाट नगद पुरस्कार र प्रशंसापत्र
: दैवी प्रकोप सेवा पदक, नेपाल राष्ट्रिय शिक्षक संगठन, श्री सिंहवाहिनी मा.वि. तथा महिला विकास कार्यालय तेह्रथुमबाट अभिनन्दित

नामथर : श्री लोकनाथ लुइटेल
जन्ममिति : २२/२/१९९७ वि.सं.
जन्मस्थान : सोल्मा गा.वि.स. कालिमाटी, तेह्रथुम
शैक्षिक योग्यता : बी.एड.र संकृत साहित्याचार्य
अनुभव : ३५ वर्ष माध्यमिक तहमा शिक्षक
: २ वर्ष प्रधानाध्यापक
तह : मा. वि. तृतीय
रुची : समाज सेवा, संस्कृत पठनपाठन, विष्णुभक्ति, भागवत मनन एवंम कथाकहानी लेखरचना संस्कृतमा कविता रचना
पदक : जिल्ला शिक्षा समितिबाट दीर्घकालीन शिक्षा सेवा कदर पत्र, शारदा मा.वि. खनारबाट पुरस्कृत
कृति : सरल पूजाविधिः(सम्पादन प्रेसमा)
अरु रचना प्रकासोन्मुख
सम्प्रति : अध्यक्ष - श्रीवैष्णव परिषद धरान उपशाखा,
अध्यक्ष - व्यवस्थापन समिति श्री च.सं.मा.वि. धरान-१६
अध्यक्ष - विश्व हिन्दु महासंघ, धरान नगर समिति
उपाध्यक्ष- श्री लक्ष्मीनारायण मन्दिर, धरान-३, तुर्के

Jayatu Sanskritam, Kathmandu, Nepal